हंसदूतः।

दुकूलं बिभ्राणो दलितहरितालद्युतिहरं
जवापुष्पश्रेणीरुचिरुचिरपादाम्बुजतलः।

आकर्णान्ते चाक्षुषि मनोहरे लोचने यस्यास्तत्सम्बुद्धौ, मे मम मनः अपहृत्य क्व यासि ? अत्र अस्मिन् देशे किम् अराजकं राजाभावः राजते। वर्त्तते इति पाठान्तरम्। नैवास्त्यराजकं, तस्मात् ते मनश्चौर्यरूपस्य कार्यस्यावश्यं शासनं भविष्यतीति भावः ॥ १९ ॥

कोप इति। हे पङ्कजाक्षि पद्मनेत्रे ! त्वया यदि मयि कोपः कृतः, सः कोपः मम प्रियः नाहमिति भावः अस्तु भवतु, अत्र अस्मिन् विषये अन्यत् किं विधेयं कर्त्तव्यं न किमपि करणीयमस्ति ममेति भावः। किन्तु मया अर्पितपूर्वं पूर्वं दत्तम् आश्लेषम् आलिङ्गनम् उच्चैः गाढं यथा तथा अर्पय प्रतिदेहि, मया अर्पितं चुम्बनञ्च उच्चैः समर्पय। वसन्ततिलकं वृत्तम् ॥ २० ॥

दुकूलमिति। दलितं खण्डितं यत् हरितालं तस्य द्युतिहरं कान्तिचौरं पीतमिति भावः दुकूलं वसनं दधानः परिदधत् जवापु-

तमालश्यामाङ्गो दरहसितलीलाञ्चितमुखः
परानन्दाभोगः स्फुरतु हृदि मे कोऽपि पुरुषः ॥ १ ॥

यदा यातो गोपीहृदयमदनो नन्दसदनात्
मुकुन्दो गान्दिन्यास्तनयमनुविन्दन् मधुपुरीम्।
तदामाङ्क्षीच्चिन्तासरिति घनघूर्णापरिचयै-
रगाधायां बाधामयपयसि राधा विरहिणी ॥ २ ॥

कदाचित् खेदाग्निं विघटयितुमन्तर्गतमसौ
सहालीभिर्लेभे तरलितमना यामुनतटीम्।

श्यामां श्रेण्या रुचिरिव कान्तिरिव रुचिर्यस्य तादृशं रुचिरं मनोज्ञं पादाम्बुजतलं चरणकमलतलं यस्य तथाभूतः तमालवत् श्यामम् अङ्गं यस्य तथोक्तः दरहसितस्य मन्दस्मितस्य लीलया विलासेन अञ्चितं पूजितं श्लाघ्यमिति भावः मुखं यस्य तथाभूतः परः महान् आनन्दस्य आभोगः परिपूर्णता यस्य तादृशः अथवा परमानन्दमय इत्यर्थः कोऽपि अनिर्वचनीयः पुरुषः कृष्ण इति भावः मे मम हृदि स्फुरतु राजताम्। शिखरिणीवृत्तमस्मिन् सन्दर्भे। उपमालङ्कारः। ग्रन्थारम्भे विघ्नविनाशार्थं कवेरिष्टदेवतासंकीर्त्तनरूपं मङ्गलाचरणमिदम् ॥ १ ॥

यदेति। गोपीनां हृदयमदनः मनोमोहनः मुकुन्दः कृष्णः यदा गान्दिन्याः तनयम् अक्रूरम् अनुविन्दन् अनुलभमानः अनुसरन् वा नन्दसदनात् नन्दालयात् मधुपुरीं मथुरां यातः गतः, तदा विरहिणी राधा घनाः सान्द्रा या घूर्णाः भ्रमयः तासां परिचयैः सङ्गैः अगाधायाम् अतलस्पर्शायाम् अपारायामिति भावः बाधामयानि दुःखमयानि पयांसि जलानि यस्यां तथाभूतायां चिन्तासरिति अमाङ्क्षीत् निममज्ज। रूपकमलङ्कारः ॥ २ ॥

कदाचिदिति। कदाचित् असौ राधा आलीभिः सखीभिः सह

चिरादस्याश्चित्तं परिचितकुटीरावकलनाद्
अवस्थां तस्तार स्फुटमथ सुषुप्तेः प्रियसखीम् ॥ ३ ॥
तदा निष्पन्दाङ्गी कलितनलिनीपल्लवकुलैः
परीणाहात् प्रेम्णामकुशलशताशङ्किहृदयैः ।
दृगम्भोगम्भीरीकृतमिहिरपुत्रीलहरिभि-
र्विलीना धूलीनामुपरि परिवव्रे परिजनैः ॥ ४ ॥
ततस्तां न्यस्ताङ्गीमुरसि ललितायाः कमलिनी-
पलाशैः कालिन्दीसलिलशिशिरैर्वीजिततनुम् ।

अन्तर्गतं खेदाग्निं विरहजशोकानलं विघटयितुं निर्वापयितुं तरलितमनाः चञ्चलितचित्ता सती यामुनतटीं यमुनातीरं लेभे मतवती । अथ यमुनातीरप्राप्त्यनन्तरम् अस्या राधायाः चित्तं मनः चिरात् परिचितानां भुक्तानामिति भावः कुटीराणां कुञ्जानामिति भावः अवकलनात् अवलोकनात् सुषुप्तेः सुखमहमस्वाप्सं न किञ्चिदवेदिषमित्येवंरूपा संवित् यदन्ते स्यात् सा निद्रा सुषुप्तिः तस्याः प्रियसखीम् अवस्थां मूर्च्छामिति भावः स्फुटं सम्यक् यथा तथा तस्तार प्राप लुमोहेति भावः ॥ ३ ॥

तदेति । तदा तस्मिन् काले मूर्च्छावस्थायामिति भावः निस्पन्दं निश्चलम् अङ्गं यस्याः तथाभूता अतएव धूलीनामुपरि विलीना लुण्ठिता सा कलितं गृहीतं नलिनीपल्लवकुलं पद्मपत्रचयः व्यजनार्थमिति भावः यैः तथोक्तैः, प्रेम्णां परीणाहात् आतिशय्यात् अकुशलशतम् अमङ्गलशतं जीवति न वेत्यादिरूपम् आशङ्कते इति तादृशं हृदयं येषां तैः, दृगम्भोभिः नयनजलैः गम्भीरीकृता पूरितेति यावत् मिहिरपुत्र्याः यमुनायाः लहर्यस्तरङ्गाः यैः तथाभूतैः परिजनैः सखीभिरिति भावः परिवव्रे परितः वेष्टिता ॥ ४ ॥

तत इति । ततः अनन्तरं ललितायाः तदाख्यसख्याः उरसि

पराहृत्तश्वासाङ्कुरचलितकण्ठीं कलयतां
सखीसन्दोहानां प्रमदभरशाली ध्वनिरभूत् ॥ ५ ॥
निधायाङ्के पङ्केरुहदलविटङ्कस्य ललिता
ततो राधां नीराहरणसरणीन्यस्तचरणा ।
मिलन्तं कालिन्दीपुलिनभुवि खेलाञ्चितगतिं
ददर्शाग्रे कञ्चिन्मधुरविरुतं श्वेतगरुतम् ॥ ६ ॥
तदालोकस्तोकोच्छ्वसितहृदया सादरमसौ
प्रणामं शंसन्ती लघु लघु समासाद्य सविधम् ।
धृतोत्कण्ठा सद्यो हरिसदसि सन्देशहरणे
वरं दूतं मेने तमतिललितं हन्त ! ललिता ॥ ७ ॥

क्वचि न्यस्ताङ्गीं निहितकलेवरां कालिन्द्याः यमुनायाः सलिलेन शिशिरैः शीतलैः कमलिनीपलाशैः पद्मपत्रैः वीजिता तनुः शरीरं यस्याः तथोक्तां परावृत्तेन प्रत्यागतेन श्वासाङ्कुरेण मन्दश्वासेनेत्यर्थः चलितः स्पन्दितः कण्ठो यस्याः तादृशीं कलयतां पश्यतां सखीसन्दोहानां सहचरीसङ्घानां प्रमदभरेण हर्षातिशयेन शालते शोभते इति तथोक्तः ध्वनिः आनन्दकोलाहल इति यावत् अभूत् ॥ ५ ॥

निधायेति । ततः अनन्तरं प्रत्यागतश्वासानन्तरं ललिता नीराहरणार्थं जलाहरणार्थं या सरणी सोपानं तस्यां न्यस्तचरणा अर्पितपादा सती पङ्केरुहदलविटङ्कस्य पद्मपत्ररचितशयनीयस्येति यावत् अङ्के क्रोडे उपरीत्यर्थः राधां निधाय स्थापयित्वा कालिन्द्याः यमुनायाः पुलिनभुवि सैकतदेशे मिलन्तं चरन्तम् अग्रे खेलया विलासेन अञ्चिता प्रशंसिता गतिर्गमनं यस्य तथोक्तं मधुरविरुतं मनोज्ञनिनादं कञ्चित् श्वेतगरुतं शुभ्रपक्षं हंसमिति यावत् ददर्श ॥ ६ ॥

तदेति । हन्त खेदे, असौ ललिता तस्य हंसस्य आलोकेन दर्शनेन स्तोकम् अल्पम् उच्छ्वसितम् उत्फुल्लं हृदयं यस्यास्तथाभूता

अमर्षात् प्रेमेर्ष्यां सपदि दधती कंसमथने
प्रवृत्ता हंसाय स्वमभिलषितं शंसितुमसौ ।
न तस्या दोषोऽयं यदिह विहगं प्रार्थितवती
न कस्मिन् विश्रम्भं दिशति हरिभक्तिप्रणयिता ॥ ८ ॥
पवित्रेषु प्रायो विरचयसि तोयेषु वसतिं
प्रमोदं नालीके वहसि विशदात्मा स्वयमसि ।
अतोऽहं दुःखार्त्ता शरणमबला त्वां गतवती
न भिक्षा सत्पक्षे व्रजति हि कदाचिद्विफलताम् ॥ ९ ॥

तथा हृतोत्कण्ठा उत्सुकचित्तेत्यर्थः लघु लघु शनैः शनैः सविधं समीपं समासाद्य आगत्य सादरं प्रणामं शंसन्ती प्रणमन्तीति यावत् सद्यः तत्क्षणं हारिसदसि कृष्णसभायां मथुरायामिति भावः सन्देशहरणे वाचिकप्रेषणे वाचिकप्रेषणार्थमित्यर्थः तम् अतिललितं सुन्दरं हंसं वरं श्रेष्ठं दूतं सन्देशहरं, स्यात् सन्देशहरो दूत इत्यमरः । मेने दौत्याय प्रेरयितुमभिमतवतीत्यर्थः ॥ ७ ॥

अमर्षादिति । अमर्षात् कोपात् सपदि तत्क्षणं कंसमथने कृष्णे प्रेमेर्ष्यां प्रेमजनिताम् ईर्ष्यां दधती असौ ललिता हंसाय स्वम् अभिलषितं शंसितुं कथयितुं प्रवृत्ता प्रारेभे । इह विषये सन्देशहरणे दूत्यर्थं यत् सा विहगं पक्षिणं हंसं प्रार्थितवती, अयं तस्याः ललितायाः दोषः अविमृश्यकारित्वरूप इति भावः न, हरिभक्तिप्रणयिता हरौ भक्त्यतिरेक इति यावत् कस्मिन् जने विश्रम्भं विश्वासं न दिशति, न जनयति ? अपितु सर्वस्मिन्नेव विश्रम्भं दिशतीत्यर्थः । अर्थान्तरन्यासः ॥ ८ ॥

पवित्रेष्विति । प्रायः बाहुल्येन पवित्रेषु विशुद्धेषु तोयेषु वसतिम् अवस्थानं विरचयसि करोषि, नालीके कमलसमूहे बहुलमध्ये इति भावः प्रमोदम् आनन्दं वहसि, स्वयञ्च विशदात्मा

चिरं विस्मृत्यास्मान् विरहदहनज्वालविकलाः
कलावान् सानन्दं वसति मथुरायां मधुरिपुः ।
तदेतं सन्देशं स्वमनसि समाधाय निखिलं
भवान् क्षिप्रं तस्य श्रवणपदवीं सङ्क्रमयतु ॥ १० ॥
निरस्तप्रत्यूहं भवतु भवतो वर्त्मनि शिवं
समुत्तिष्ठ क्षिप्रं मनसि मुदमाधाय सदयम् ।
अधस्ताद्धावन्तो लघु लघु समुत्ताननयनै-
र्भवन्तं वीक्षन्तां कुतुकतरला गोपशिशवः ॥ ११ ॥

स्वच्छान्तःकरणः असि । अतः कारणात् दुःखार्त्ता अबलाहं त्वां शरणं गतवती, हि यतः सत्पक्षे साधुजने उत्कृष्टपक्षवति च शिष्टा प्रार्थना कदाचित् विफलतां व्यर्थतां न व्रजति न गच्छति । अर्थान्तरन्यासोऽलङ्कारः ॥ ९ ॥

चिरमिति । कलावान् चतुःषष्टिकलापूर्णः मधुरिपुः कृष्णः विरहदहनस्य विच्छेदाग्नेः ज्वालेन विकलाः व्याकुलाः अस्मान् विस्मृत्य मथुरायां चिरं दीर्घकालं सानन्दं वसति । तत् तस्मात् भवान् एतं निखिलं समग्रं सन्देशं स्वमनसि समाधाय गृहीत्वा क्षिप्रं शीघ्रं तस्य मधुरिपोः श्रवणपदवीं श्रोत्रेन्द्रियं सङ्क्रमयतु प्रापयतु ॥१०॥

निरस्तेति । भवतः वर्त्मनि पथि निरस्तः नष्टः प्रत्यूहः विघ्नः यस्मात् तथाभूतं शिवं मङ्गलं भवतु । सदयं सानुकम्पं मनसि मुदं हर्षम् आधाय क्षिप्रं शीघ्रं समुत्तिष्ठ यात्रां कुर्वित्यर्थः । कुतुकेन कौतूहलेन तरलाश्चञ्चलाः गोपानां शिशवः बालकाः लघु लघु द्रुतं द्रुतम् अधस्तात् तलदेशे धावन्तः सन्तः समुत्ताननयनैः उत्क्षिप्तनेत्रैः भवन्तम् उड्डयमानमिति भावः वीक्षन्ताम् अवलोकयन्तु ॥ ११ ॥

किशोरोत्तंसोऽसौ कठिनमतिना दानपतिना
यया निन्ये तूर्णं पशुप-युवतीजीवितपतिः ।
तया गन्तव्या ते निखिलजगदेकप्रथितया
पदव्या भव्यानां तिलक ! किल दाशार्हनगरी ॥ १२ ॥
गलद्बाष्पासारप्लुतधवलगण्डा मृगदृशो
विदूयन्ते यत्र प्रबलमदना वेशविवशाः ।
त्वया विज्ञातव्या हरिचरणसङ्गप्रणयिनी
ध्रुवं सा चक्राङ्की रतिसखशताङ्कस्य पदवी ॥ १३ ॥

किशोरेति । पशुपयुवतीनां गोपाङ्गनानां जीवितपतिः प्राणेश्वरः किशोरोत्तंसः कुमारश्रेष्ठः असौ कृष्णः कठिनमतिना क्रूरबुद्धिना दानपतिना अक्रूरेण यया पदव्या पथा निन्ये नीतः, हे भव्यानां साधूनां तिलक ! तया निखिलजगत्सु सर्वभूमण्डलेषु एकप्रथितया सम्यक् प्रसिद्धया पदव्या तूर्णं शीघ्रं दाशार्हनगरी दाशार्हाणां यादवविशेषाणां नगरी पुरी मथुरेत्यर्थः ते तव गन्तव्या यातव्या ॥ १२ ॥

गलदिति । यत्र यस्यां पदव्यां गलद्भिः पतद्भिः बाष्पासारैः अश्रुधाराभिः प्लुतौ व्याप्तौ धवलौ स्वच्छौ गण्डौ यासां ताः, प्रबलः मदनः कामः यासां तथोक्ताः कृष्णादर्शनादिति भावः, वेशे वेश्याश्रयः (?), वेशो वेश्याजनाश्रय इत्यमरः । विवशाः कामार्त्ता इति यावत् मृगदृशः मृगनयनाः नार्य्य इत्यर्थः विदूयन्ते व्यथन्ते सततं कृष्णादर्शनानन्तरमेव तदवलोकनादिति भावः, हरिचरणस्य सङ्गप्रणयिनी अतएव चक्राङ्की चक्रचिह्निता रतिसखशतवत् कामशतवत् मनोहरमिति भावः अङ्कं यस्य तादृशस्य कृष्णस्येति यावत् सा पदवी पन्थाः त्वया ध्रुवं निश्चितं तत्तदवलोकनेनेति भावः विज्ञातव्या विशेषेण वेदितव्या ॥ १३ ॥

पिबन् अम्बु श्यामं मिहिरदुहितुर्वारि मधुरं
मृणालीर्भुञ्जानो हिमकरकलाकोमलरुचः ।
क्षणं हृष्टस्तिष्ठन् निविडविटपे शाखिनि सखे !
सुखेन प्रस्थानं रचयतु भवान् हस्तिनगरे ॥ १४ ॥
बलादाक्रन्दन्ती रथपथिकमक्रूरमिलितं
विदूरादाभीरीततिरनुययौ येन रमणम् ।
तमादौ पन्थानं रचय चरितार्था भवतु ते
विराजन्ती सर्वोपरि परमहंसस्थितिरियम् ॥ १५ ॥
अकस्मादस्माकं हरिरपहरन् शुकचयं
समारूढो गूढप्रणयलहरीं कन्दलयितुम् ।

पिबन्निति । हे सखे ! भवान् अम्बुवत् श्यामं कृष्णं मिहिरदुहितुः यमुनायाः मधुरं वारि जलं पिबन् हिमकरकलाः चन्द्रकलाः तद्वत् कोमलाः रुचः प्रभाः यासां ताः मृणालीः भुञ्जानः क्षणं हृष्टः निविडविटपे घनशाखे शाखिनि वृक्षे तिष्ठन् हस्तिनगरे हस्तिनापुर्यां सुखेन प्रस्थानं रचयतु करोतु ॥ १४ ॥

बलादिति । बलात् वेगात् अभिप्रायेनेत्यर्थः विदूरात् आक्रन्दन्ती रुदती आभीरीततिः गोपनारीसंहतिः येन पथा रथपथिकं रथेन यान्तम् अक्रूरमिलितम् अक्रूरेण सह सङ्गतं रमणं कान्तं कृष्णमित्यर्थः अनुययौ अनुयाति स्म, आदौ प्रथमं तं पन्थानं रचय गच्छ, ते तव सर्वोपरि सर्वेषाम् उपरि विराजन्ती उत्कर्षेण वर्त्तमानेति भावः इयं परमहंसस्थितिः परमहंसस्य योगिनः स्थितिः अवस्थानं मर्यादा च चरितार्था सफला भवतु तन्मार्गदर्शनादिति भावः ॥ १५ ॥

अकस्मादिति । हे [illegible] ! कलहंस ! हरिः कृष्णः अकस्मात् सहसा अस्माकम् शुकचयं वसनसमूहम् अपहरन् चोरयन्

तव श्रान्तस्यान्तःस्थगितरविबिम्बः किसलयैः
कदम्बः कादम्ब ! त्वरितमवलम्बः स भविता ॥ १६ ॥
किरन्ती लावण्यं दिशि दिशि शिखण्डस्तवकिनी
दधाना साधीयः कनकविमलद्योतिवसनम् ।
तमालश्यामाङ्गी सरलमुरलीचुम्बितमुखी
जगौ चित्रं यत्र प्रकटपरमानन्दलहरी ॥ १७ ॥
तया भूयः क्रीड़ारभसविकसद्वल्लववधू-
वपुर्वल्लीभ्रश्यन्मृगमदकणश्यामलिकया ।

गूढ़ा गुप्ता या प्रणयलहरी प्रेमतरङ्गः तां कन्दलयितुं प्रकटयितुं कलहयितुं वा यस्य आरूढ़ः, किसलयैः पल्लवैः अन्तः अभ्यन्तरे स्थगितं तिरोहितं रविबिम्बं सूर्य्यरश्मिरिति भावः येन तथाभूतः कदम्बः सः कदम्बतरुः श्रान्तस्य अध्वगमनादिति भावः तव त्वरितं शीघ्रम् अविदूरस्थितत्वादिति भावः अवलम्बः आश्रयः भविता। तमाश्रित्य त्वया विश्रमितव्यमिति भावः ॥ १६ ॥

किरन्तीति । यत्र कदम्बे स्थितेति शेषः, दिशि दिशि लावण्यं किरन्ती विक्षिपन्ती, शिखण्डस्तवकिनी मयूरपिच्छगुच्छलाञ्छितेत्यर्थः साधीयः अतिमनोज्ञं कनकवत् विमलं यथा तथा द्योतते दीप्यते इति तथोक्तं वसनं पीतम् अम्बरमित्यर्थः दधाना वसाना, तमालवत् श्यामम् अङ्गं यस्यास्तादृशी सरलया अकुटिलया मुरल्या चुम्बितं मुखं यस्यास्तादृशी, प्रकटा उद्भटा परमानन्दानां लहरी तरङ्गः कृष्ण इति भावः चित्रं मनोज्ञं यथा तथा जगौ गीतवतीत्यर्थः ॥ १७ ॥

तयेति । भूयः पुनः क्रीड़ायां निधुवनोत्सवे यो रभसः वेगो हर्षो वा, रभसो वेगहर्षयोरित्यमरः । तेन विकसन्त्यः याः वल्लवानां गोपानां वध्वः तासां वपुर्वल्लीभ्यः अङ्गलताभ्यः भ्रश्यद्भिः गलद्भिः

विधात्र्यो हर्षोत्कदलितमञ्जीलतिकया-
समन्तादुल्लासस्तव मनसि रासस्थलिकया ॥ १७ ॥

तदन्ते वासन्तीविरचितमनङ्गोत्सवकला-
चतुःशालं शौरेः स्फुरति न दृशौ तत्र शिशिरेः ।
तदालोकोद्भेदप्रमदभरविस्मारितगति-
क्रिये जाने तावत्त्वयि बत हृता गोपवनिता ॥ १८ ॥

मम स्यादर्थानां क्षतिरिह विलम्बाद्यदपि ते
विलोकेथाः सर्वं तदपि हरिकेलिस्थलमिदम् ।

मृगमदपङ्कैः कस्तूरीबिन्दुभिः श्यामलिकया मालिन्यं नीतवेषैः कृष्णैः मधुकरैः कदम्बिता व्याकोणी सङ्कीर्णिता मल्लिकाचलता यस्यां तथाभूतया रासस्थलिकया रासोत्सवस्थलेन तव मनसि समन्तात् सर्वतः उल्लासः आनन्दः विधातव्यः जनयितव्यः । रासोत्सवस्थलावलोकनेन पथि तव महान् आनन्दो भविष्यतीति भावः ॥ १७ ॥

तदिति । तस्याः रासस्थलिकायाः अन्ते वासन्ती वसन्तोत्सवः तथा तदर्थमिति भावः विरचितम् अनङ्गोत्सवः कामोत्सव एव कला व्यापारः यस्याः चतुःशालं शालाचतुष्टयान्वितं सदनमिति यावत् स्फुरति राजते, तत्र चतुःशाले दृशौ नयने न शिशिरेः नार्पय । बत खेदे तस्य चतुःशालस्य आलोकेन दर्शनेन उद्भेदः उदयः यस्य तथोक्तः प्रमदभरः आनन्दातिशयः तेन विस्मारिता विस्मृतिं नीता गतिक्रिया गमनव्यापारः यस्य तादृशे त्वयि सति गोपवनिता गोपाङ्गना हृता नाशं गता, तावत् जाने मन्ये । काव्यलिङ्गमलङ्कारः । हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते इति दर्पणकारः ॥ १८ ॥

ममेति । यदपि यद्यपि ते तव इह विलम्बात् मम अर्थानां कार्याणां क्षतिः हानिः स्यात् यदपि तथापि सर्वं हरिकेलिस्थल-

तवेयं न व्यर्था भवतु शुचिता कः स हि सखे !
गुणो यश्चाणूरद्विषि मयि निवेशाय न भवेत् ॥ २० ॥
सकृद्वंशीनादश्रवणमिलिताभीरवनिता-
रहःक्रीड़ासाक्षी प्रतिपदलतासद्मसुभगः ।
स धेनूनां बन्धुर्मधुमथनखट्टायितशिलः
करिष्यत्यानन्दं सपदि तव गोवर्द्धनगिरिः ॥ २१ ॥
तमेवाद्रिं चक्राङ्कितकरपरिष्वङ्गरसिकं
महीचक्रे शङ्के महि शिखरिणां शेखरतया ।

मिदं विशेषयोः पद्यैः । हे सखे ! तव इयं शुचिता स्वच्छहृदयता पवित्रतेति भावः व्यर्था विफलार्था न भवतु अन्यथा भवत्विति यावत् तदुत्स्थानदर्शनेनेति भावः । हि यतः कः स गुणः अस्तीति शेषः यः चाणूरद्विषि चाणूरासुरघातिनि कृष्णे मयि निवेशाय मदन्तःकरणप्रवेशाय न भवेत्, अपितु सर्व एव गुणः कृष्णस्य मदन्तरात्मनि निविष्टः आसीत् येन गुणेन तव तदीयवासोत्सवस्थानदर्शनेन विशुद्धता स्यादिति भावः ॥ २० ॥

सकृदिति । सकृत् एकवारं वंशीनादश्रवणेन मिलितानां सङ्गतानाम् आभीरवनितानां गोपीनां रहसि विजने या क्रीड़ा सुरतोत्सवः तस्य साक्षी साक्षात् द्रष्टा प्रतिपदे स्थाने स्थाने लतासद्मभिः लतावेष्टितकुञ्जैः सुभगः मनोहरः धेनूनां गवां बन्धुः गवां सुखेन चरणस्थानमित्यर्थः मधुमथनस्य कृष्णस्य खट्टायिता पर्यङ्कवदाचरिता शिला यस्य तथोक्तः स गोवर्द्धनगिरिः सपदि दृष्टमात्र एव ते तव आनन्दं करिष्यति जनयिष्यति ॥ २१ ॥

तमिति । चक्राङ्कितेन चक्रचिह्नितेन करेण यः परिष्वङ्गः आलिङ्गनं स्पर्शमिति यावत् तस्य रसिकं रसज्ञं तज्जनितसुखाभिज्ञमित्यर्थः तम् एव अद्रिं पर्वतं महीचक्रे भूमण्डले शिखरिणां

अरातिं ख्यातीनां ननु हरिहयं यः परिभवन्
यथार्थं स्वं नाम व्यधित भुवि गोवर्द्धन इति ॥ २२ ॥
तमालस्यालोकाद्गिरिपरिसरे सन्ति चपलाः
पुलिन्दो गोविन्दस्मरणरभसोत्तप्तवपुषः ।
शनैस्तापं तासां क्षणमपनयन् यास्यति भवान्
अवश्यं कालिन्दीसलिलशिशिरैः पक्ष्मपवनैः ॥ २३ ॥

पर्वतानां शेखरतया शिरोभूषणतया यद्वर्त्महि स एव शिखर सर्वेषां शिखरिणां श्रेष्ठ इति मन्यामहे, इत्यर्थः । ननु भोः यः अद्रिः ख्यातीनां पर्वतानामिति भावः अरातिं शत्रुं पक्षच्छेदिनमिति भावः हरिहयम् इन्द्रं परिभवन् पराजयमानः सन् भुवि पृथिव्यां गोवर्द्धन इति स्वं नाम यथार्थम् अन्वर्थं कुपितेन्द्रनियोजितमेघैः सप्ताहं वर्षणेऽपि गोकुलरक्षणादिति भावः व्यधित कृतवान् । पुरा इन्द्रमखं निषिध्य कृष्णेन गोवर्द्धनोत्सवे कृते इन्द्रः कुपितः सप्ताहं गोकुलं सुषलधारया वृष्ट्या आच्छादयामास । तदवलोक्य कृष्णः गोकुलं रिरक्षिषुः करेण गोवर्द्धनं धृत्वा तत्तले गोपान् गा वत्सांश्च निवेश्य वर्षापदं निवारयामासेति भागवती वार्त्ता ॥ २२ ॥

तमालस्येति । गिरेः गोवर्द्धनस्य परिसरे पार्श्वदेशे तमालस्य तमालतरोरालोकात् दर्शनात् चपलाः उत्सुकाः अतएव गोविन्दस्मरणेन यः रभसः आवेगः तेन उत्तप्तं वपुः शरीरं येषां तथाभूताः पुलिन्दाः म्लेच्छजातिविशेषाः सन्ति वसन्तीत्यर्थः । भवान् कालिन्दीसलिलेन यमुनाजलसङ्गेनेति भावः शिशिरैः शीतलैः पक्ष्मपवनैः तेषां क्षणं क्षणिकमित्यर्थः गोविन्दस्मरणकाले तदनवलोकनजमिति भावः तापम् अवश्यम् अपनयन् अपनुदन् शनैः मन्दं मन्दं यास्यति गमिष्यति ॥ २३ ॥

तदन्ते श्रीकान्तस्मरसमरधाटी पुलकिता
कदम्बानां वाटी रसिकपरिपाटीं स्फुटयति ।
त्वमासीनस्तस्यां न यदि परितो नन्दसि ततो
बभूव व्यर्था ते घनरसनिवेशव्यसनिता ॥ २४ ॥

शरन्मेघश्रेणीप्रतिभटमरिष्टासुरशिर-
श्चिरं शुष्कं वृन्दावनपरिसरे द्रक्ष्यति भवान् ।
यदारोढुं दूरान्मिलति किल कैलासशिखरि-
भ्रमाक्रान्तस्वान्तो गिरिशसुहृदः किङ्करगणः ॥

तदन्त इति । तस्य गिरेः अन्ते शेषे श्रीकान्तस्य कृष्णस्य स्मरस्य कामसंग्रामस्य मदनोत्सवस्येत्यर्थः धाटी रङ्गावष्टम्भूतेव परीक्षास्थानमिति भावः अतएव पुलकिता कुसुमोद्गमात् सञ्जातपुलकेत्यर्थः तदुत्सवस्मरणादिति भावः कदम्बानां वाटी कदम्बवनवेष्टितकुञ्जमिति यावत् रसिकानां परिपाटीं श्रेणीं स्फुटयति रसम् आस्वादयतीति भावः । त्वं यदि तस्याः कदम्बपरिपाट्याम् आसीन, उपविष्टः सन् परितः समन्तात् न नन्दसि आनन्दमनुभवसि, ततस्तदा ते तव घनरसे आद्यरसे योऽभिनिवेशः समासक्तिः तस्मिन् व्यसनिता प्रवृत्तिरिति यावत् व्यर्था विफला बभूव भवतीति यावत्, वर्त्तमाने लिट्प्रयोगश्चिन्त्यः ॥ २४ ॥

शरदिति । वृन्दावनपरिसरे भवान् चिरं शुष्कम् अतएव शरन्मेघश्रेणीप्रतिभटं शरत्कालीनमेघराजिसदृशमित्यर्थः अरिष्टासुरस्य अरिष्टाख्यदानवस्य शिरः द्रक्ष्यति, किल प्रसिद्धौ, गिरिशस्य हरस्य यः सुहृत् सखा कुबेरः तस्य किङ्करगणः यक्षगणः कैलासशिखरिणः कैलासपर्वतस्य भ्रमेण आक्रान्तं स्वान्तं मनः यस्य तथाभूतः सन् दूरात् यत् शिरः आरोढुं मिलति आगच्छति । भ्रान्तिमानलङ्कारः ॥ २५ ॥

क्वणन् याहि स्वैरं चरमदशया चुम्बितरुचो
नितम्बिन्यो वृन्दावनभुवि सखे ! सन्ति बहवः ।
परावर्त्तिष्यन्ते तुलितमुरजिन्नूपुररवात्
तव ध्वानात् तासां वहिरपि गताः क्षिप्रमसवः ॥२६॥
त्वमासीनः शाखान्तरमिलितचञ्चत्त्विषि सुखं
दधीथा भाण्डीरे क्षणमपि घनश्यामलरुचौ ।
ततो हंसा बिभ्रन्निखिलनभसश्चिक्रमिषया
स वर्द्धिष्णुं विष्णुं कलितदरचक्रं तुलयिता ॥ २७ ॥
त्वमष्टाभिर्नेत्रैर्विगलदमलप्रेमसलिलै-

क्वणन्निति । हे सखे त्वं स्वैरम् उच्चैः क्वणन् नदन् वृन्दावनभुवि वृन्दारण्ये बहवः नितम्बिन्यः चरमदशया कृष्णविरहेण प्राप्तया अन्त्यदशया चुम्बिताः आक्रान्ताः रुचः कान्तयः यासां तथाभूताः सन्ति । तुलितः समीकृतः अनुकृत इति यावत् मुरजितः कृष्णस्य नूपुररवः येन तस्मात् तव ध्वानात् निनादात् तासां वहिरपि गताः असवः प्राणाः क्षिप्रं परावर्त्तिष्यन्ते प्रत्यागमिष्यन्ति ॥ २६ ॥

त्वमिति । शाखान्तरेषु मिलितः सङ्गतः चञ्चत्त्विट् सूर्यः यस्य तथोक्ते गगनस्पर्शिनीति भावः घनाः श्यामलाः रुचयः कान्तयः यस्य तथोक्ते भाण्डीरे वृक्षभेदे क्षणमपि आसीनः उपविष्टः त्वं सुखं दधीथाः अनुभवेः । ततः अनन्तरं हे हंस ! बिभ्रत् तथा शोभां गच्छन् स भाण्डीरः निखिलस्य समस्तस्य नभसः आकाशस्य चिक्रमिषया क्रमितुमिच्छया वर्द्धिष्णुं वर्द्धनशीलं कलितं गृहीतं दरचक्रं शङ्खचक्रास्त्रं येन तथोक्तं विष्णुं वामनरूपिणमिति यावत् तुलयिता समीकर्त्ता अनुकरिष्यतीत्यर्थः ॥ २७ ॥

त्वमिति । हे चतुर ! विगलन्ति क्षरन्ति अमलानि निर्मलानि

मुहुः सिक्तास्तम्भां चतुर ! चतुरास्यस्तुतिभुवम् ।
जिहीथा विख्यातां स्फुटमिह भवद्बान्धवरथं
प्रविष्टं मंस्यन्ते विधिमटविदेव्यस्त्वयि गते ॥ २८ ॥
उदञ्चन्नेत्राम्भःप्रसरलहरीपिच्छिलपथ-
स्खलत्पादन्यासप्रणिहितविलम्बाकुलधियः ।
हरौ यस्मिन्मग्ने त्वरितयमुनाकूलगमन-
स्पृहाक्षिप्ता गोप्यो ययुरनुपदं कामपि दशाम् ॥ २९ ॥

प्रेमसलिलानि आनन्दाश्रूणि येभ्यः तथाभूतैः अष्टाभिः नेत्रैः मुहुः पुनः पुनः सिक्ताः स्तम्भाः आधारदण्डाः यस्यास्ताम् अतएव विख्यातां चतुरास्यस्य चतुर्मुखस्य ब्रह्मणः स्तुतिभुवं स्तोत्रस्थानं यत्र स्थितो ब्रह्मा निजमोहावसाने भगवन्तं कृष्णं तुष्टावेति भावः जिहीथाः गच्छ । इह अस्मिन् प्रदेशे त्वयि गते सति अटविदेव्यः अरण्याधिष्ठातृदेवताः भवतः बान्धवः हंस इत्यर्थः स एव रथो यस्य तादृशं विधिं ब्रह्माणं प्रविष्टं काननमिति शेषः मंस्यन्ते तर्कयिष्यन्ति स्फुटमुत्प्रेक्षे । तदीयवाहनानुरूपं भवन्तं दृष्ट्वा ब्रह्मा पुनरागत इति अनुमास्यन्तीति भावः ॥ २८ ॥

उदञ्चदिति । यस्मिन् कालियह्रदे इत्युत्तरेण सम्बन्धः हरौ कृष्णे मग्ने सति त्वरितं शीघ्रं यमुनाकूले यत् गमनं तत्र स्पृहया इच्छया आक्षिप्ताः आकृष्टाः गोप्यः अनुपदं प्रतिपादन्यासम् उदञ्चताम् उद्गच्छतां नेत्राम्भसां नयनसलिलानां प्रसराः धारा एव लहर्य्यः वीचयः ताभिः पिच्छिले पथि स्खलन् स्थानात् भ्रश्यन् यः पादन्यासः तस्मिन् प्रणिहिता नियुक्ता विलम्बेन आकुला धीर्बुद्धिर्यासां तथाभूताः सत्यः कामपि अनिर्वचनीयां दशाम् अवस्थां ययुः प्रापुः ॥ २९ ॥

मुहुर्लास्यक्रीडाप्रमदमिलदाहोपुरुषिका-
विकाशेन भ्रष्टैः फणिमणिकुलैर्धूमलरुचौ ।
पुरस्तस्मिन्नीपद्रुमकुसुमकिञ्जल्कसुरभौ
त्वया पुण्ये पेयं मधुरमुदकं कालियह्रदे ॥ २० ॥
तृषावर्तारातेर्विरहदवसन्तापिततनोः
सदाभीरीवृन्दप्रणयबहुमानोन्नतिविदः ।
प्रणेतव्यो नव्यस्तवकभरसंवर्द्धितशुच-
स्त्वया वृन्दादेव्याः परमविनयाद्वन्दनविधिः ॥ २१ ॥

मुहुरिति । पुरः अग्रतः मुहुः पुनः पुनः लास्यक्रीडायां नृत्यक्रीडायां यः प्रमदः प्रहर्षः तेन मिलन्ती सङ्गच्छन्ती या आहोपुरुषिका अहोपुरुषत्वाभिव्यभिमानः मया कालियं निर्जित्य पुरुषकारः कृत इत्यहङ्कार इति यावत् भ्रष्टैः विच्युतैः फणिनः कालियस्य मणिकुलैः शिरोरत्नसमूहैः धूमला कृष्णलोहिता रुचिः प्रभा यस्य तथाभूते कालियह्रदस्य यमुनान्तर्गतत्वात् स्वतः कृष्णत्वं तत्र रक्तप्रभमणीनां ध्वंसनेन कृष्णलोहितत्वमिति भावः, नीपद्रुमस्य कदम्बतरोः कुसुमानां किञ्जल्कैः केशरैः सुरभिः सुगन्धः तस्मिन् पुण्ये पवित्रे कालियह्रदे त्वया मधुरम् उदकं पेयम् ॥ २० ॥

तृषावर्तारातेरिति । त्वया परमविनयात् अतिविनयेनेत्यर्थः तृषावर्तस्य तदाख्यस्य असुरस्य अरातेः शत्रोः कृष्णस्य विरहदवेन विच्छेदानलेन सन्तापिता तनुः शरीरं यस्याः तथाभूतायाः सदा आभीरीवृन्दस्य गोपाङ्गनासमूहस्य प्रणयं बहुमानञ्च तयोः उन्नतिविदः नव्यानां स्तवकानां भरे वृद्धौ संवर्द्धिता शुक् शोकः यस्याः नव्यस्तवकोत्पत्तौ कृष्णस्य प्रीतिरासीत् स चेदानीं दूरं गत इति शोक इति भावः तथाभूतायाः वृन्दादेव्याः वृन्दारण्ये देवतायाः वन्दनविधिः प्रणाम इत्यर्थः प्रणेतव्यः कर्त्तव्यः ॥ २१ ॥

इति क्रान्त्वा केकाकृतविरुतिमेकादशवनीं
घनीभूतं चूतैर्व्रजमनुवनं द्वादशमिदम् ।
पुरी यस्मिन्नास्ते यदुकुलभुवां निर्मलयशो-
भराणां धाराभिर्धवलितधरित्रीपरिसरा ॥ ३२ ॥
निकेतैराकीर्णा गिरिशगिरिडिम्भप्रतिभटै-
रवष्टम्भस्तम्भावलिविलसितैः पुष्पितवना ।
निविष्टा कालिन्दीतटभुवि तवाधास्यति सखे !
समन्तादानन्दं मधुरजनवृन्दा मधुपुरी ॥ ३३ ॥
वृषः शम्भोर्यस्यां दशति नवमेकत्र यवसं
विरिञ्चेरन्यस्मिन् गिलति कलहंसो बिसलताम् ।

इतीति निकेतैरिति च । हे सखे ! इति इत्थं केकाभिर्मयूरनादैः कृता विरुतिः शब्दः यया तथोक्तां मयूरसञ्चारवतीमिति भावः एकादशवनीम् एकादशं वनमित्यर्थः पुरः अग्रतः यस्मिन् स्थाने व्रजम् अनु व्रजस्य पश्चात् चूतैः रसालैः घनीभूतं द्वादशं वनम् आस्ते, इदञ्च क्रान्त्वा अतीत्य गतस्येति अध्याहार्य्यं तत्र यदुकुलभुवां यादवानां निर्मलयशोभराणां कीर्त्तिव्रजानां धाराभिः धवलितः सितीकृतः धरित्र्या भूमेः परिसरः प्रसारः यस्याः तथोक्ता गिरिशस्य हरस्य यो गिरिः कैलास इत्यर्थः तस्य डिम्भाः शावकाः तेषां प्रतिभटैः प्रतिद्वन्द्विभिः तत्सदृशैरिति भावः अवष्टम्भाः आधारभूताः याः स्तम्भावलयः स्तम्भश्रेणयः ताभिर्विलसितैः विराजितैः निकेतैः गृहैः आकीर्णा व्याप्ता, पुष्पितं वनम् उद्यानं यस्याः तथोक्ता, कालिन्दीतटभुवि यमुनातीरभूमौ निविष्टा मधुरं मनोहरं जनानां वृन्दं यस्याः तादृशी मधुपुरी समन्तात् सर्वतः आनन्दम् आधास्यति जनयिष्यति । युग्मकमेतत् ॥ ३२ ॥ ३३ ॥

वृष इति । यस्यां पुरि शम्भोर्हरस्य वृषः एकत्र एकस्मिन् स्थाने

क्वचित् क्रौञ्चारातेः कवलयति केकी विषधरं
विलीढे शल्लक्या बलरिपुकरी पल्लवमितः ॥ २४ ॥

अबोधिष्ठाः काशान्नहि विघटितां प्रच्छदपटीं
विमुक्तामग्रासीः पथि पथि न मुक्तावलिमपि ।
अयि श्रीगोविन्दस्मरणमदिरामत्तहृदये !
सतीति ख्यातिं ते हसति कुलटानां कुलमिदम् ॥ २५ ॥

असव्यं बिभ्राणा पदमधृतलाक्षारसमसौ
प्रयाताहं मुग्धे ! विरम मम वेशैः किमधुना ।
अमन्दादाशङ्के सखि ! पुरपुरन्ध्रीकलकलात्
अलिन्दाग्रे वृन्दावनकुसुमधन्वा विजयते ॥ २६ ॥

नवं यवसं तृणं दशति खादति, अन्यस्मिन् स्थाने विरिञ्चेः ब्रह्मणः कलहंसः बिसलतां मृणालवल्लीं गिलति भक्षयति, क्वचित् स्थाने क्रौञ्चारातेः स्कन्दस्य केकी मयूरः विषधरं भुजङ्गं कवलयति ग्रसति, इतः अस्मिन् बलरिपोरिन्द्रस्य करी ऐरावतः शल्लक्याः गजप्रियवृक्षविशेषस्य पल्लवं विलीढे आस्वादयति । कृष्णदर्शनार्थं शम्भुप्रभृतयः देवा यत्रागच्छन्तीति भावः ॥ २४ ॥

इतः परं पञ्चभिः पुरीं वर्णयति अबोधिष्ठा इत्यादिभिः । अयि श्रीगोविन्दस्य स्मरणमेव मदिरा तया मत्तं हृदयं यस्यास्तत्सम्बुद्धौ, पथि मार्गे काशान् अबोधिष्ठाः ज्ञातवत्यसि, विघटितं स्खलनात् प्रभ्रष्टां प्रच्छदपटीम् उत्तरीयवसनं न ? पथि विमुक्तां भ्रष्टां मुक्तावलिं मुक्ताहारमपि न अग्रासीः न ज्ञातवत्यसि, कुलटानाम् असतीनाम् इदं कुलं ते तव सतीति साध्वीति ख्यातिं हसति ईदृशी साध्वीयं यत् कृष्णदर्शनेन ज्ञानशून्या जातेति भावः ॥ २५ ॥

असव्यमिति । असौ नारी अधृतलाक्षारसम् अलक्तकानक्तं तम्

अयं लीलापाङ्गस्नपितपुरवीथीपरिसरो
नवाशोकोत्तंसश्चलति पुरतः कंसविजयी।
किमस्मानेतस्मान्मणिभवनपृष्ठाद्विनुदती
त्वमेका स्तब्धाक्षि! स्थगयसि गवाक्षावलिमपि ॥ ३७ ॥
मुहुः शून्यां दृष्टिं वहसि रहसि ध्यायसि सदा
शृणोषि प्रत्यक्षं न परिजनविज्ञापनशतम्।
अतः शङ्के पङ्केरुहमुखि! ययौ श्यामलरुचिः
स यूनामुत्तंसस्तव नयनवीथीपथिकताम् ॥ ३८ ॥

असव्यं वामं पदम् एतेन दक्षिणं पदं बाह्यारसरञ्जितमिति व्यज्यते। बिभ्राणा दधाना गच्छतीति शेषः, हे मुग्धे! मूढे! अहं प्रयाता चलिता, विरम निवर्त्तस्व प्रसाधनादिति भावः अधुना वेशैः प्रसाधनैः किम्? न किमपि प्रयोजनमित्यर्थः। हे सखि! अमन्दात् उच्चात् पुरपुरन्ध्रीणां पुरनारीणां कलकलात् कोलाहलात् वृन्दावनस्य कुसुमधन्वा कामः कृष्ण इत्यर्थः अलिन्दस्य बहुभूमिविशेषस्य अग्रे पुरतः विजयते सर्वोत्कर्षेण वर्त्तते इति आशङ्के मन्ये ॥ ३६ ॥

अयमिति। लीलापाङ्गेन विलासकटाक्षेण स्नापितः आर्द्रीकृतः पुरवीथीनां नगरपदवीनां परिसरः स्थानं येन तथाभूतः, नवम् अशोककुसुमम् उत्तंसः कर्णभूषणं यस्य तथाविधः, अयं कंसविजयी कृष्णः पुरतः अग्रतः चलति गच्छति। हे स्तब्धाक्षि! निश्चलनेत्रे! केवलं कृष्णदर्शनार्थं व्यापारितनयने इति यावत् एका त्वम् एतस्मात् मणिभवनपृष्ठात् रत्नगृहोपरिदेशात् अस्मान् विनुदती ताड़यन्ती ताड़नार्थमिति भावः गवाक्षावलिं वातायनपङ्क्तिम् अपि किं किमर्थं स्थगयसि आच्छादयसि? ॥ ३७ ॥

मुहुरिति। हे पङ्केरुहमुखि! कमलवदने! मुहुः पुनः पुनः शून्यां लक्ष्यरहितामिति भावः दृष्टिं वहसि, सदा रहसि विजने

विलक्षं मा रोदीरिह सखि ! पुनर्यास्यति हरि-
स्तवापाङ्गक्रीडां निविडपरिचर्य्याग्रहिलताम् ।
इति स्वैरं यस्यां पथि पथि मुरारेरभिनव-
प्रवेशे नारीणां रतिरभसजल्पा ववनिरे ॥ ३९ ॥

पञ्चभिः कुलकम् ।

सखे ! साक्षाद्दामोदरवदनचन्द्रावकलन-
स्फुरत्प्रेमानन्दप्रकरलहरीचुम्बितधियः ।
मुहुस्तत्राभीरीसमुदयगिरोन्यस्तविपद-
स्तवाख्योरानन्दं विदधति पुरा पौरवनिताः ॥ ४० ॥

ध्यायति चिन्तयति, प्रत्यक्षम् अक्ष्णोः समीपे परिजनानां विज्ञापन-मतं न शक्नोति नावर्त्तयति, अतः कारणात् अङ्गे पश्चात्तापि न ग्लानकरणैः गोपकान्तिः नूनं तरुणानाम् उत्तंसः श्रेष्ठः कृष्ण इति भावः तव नवनवीनानां नेत्रराजीनां पथिकतां गोचरतां यातो पुनः पुनर्नयनपथं प्राप्नोत्वर्थः ॥ ३८ ॥

विलक्षमिति । हे सखि ! विलक्षं निर्लज्जं यथा तथा मा रोदीः न रुदिहि, इह अस्मिन् नगरे हरिः कृष्णः तव अपाङ्ग-क्रीडया कटाक्षलीलया निविडा सान्द्रा अत्यन्तमर्थः या परिचर्य्या सेवा तवेति भावः तस्यां परिचर्याम् आग्रहवन्तीं यास्यति एवमेव त्वां प्रति अनुरक्तो भविष्यतीति भावः । मुरारेः कृष्णस्य अभिनव-प्रवेशे यस्यां पुरि इतीत्थं पथि पथि प्रतिपथं नारीणां स्वैरं स्वच्छन्दं रतिरभसेन अनुरागावेशेन जल्पाः आलापाः ववनिरे अभवन्नित्यर्थः । अत्र पञ्चभिः कुलकम् ॥ ३९ ॥

सखे इति । हे सखे ! अत्र पुर्य्यां साक्षात् प्रत्यक्षीभूतस्य दामोदरवदनचन्द्रस्य कृष्णमुखचन्द्रस्य अवकलनेन अवलोकनेन स्फुरत्

अथ क्रामं क्रामं क्रमघटनया सङ्कटतरान्
निवासान् वृष्णीनामनुसर पुरीमध्यविशिखान् ।
मुरारातेर्यत्र स्थगितगगनाभिर्विजयते
पताकाभिः सन्तर्पितभुवनमन्तःपुरवरम् ॥ ४१ ॥
यदुत्सङ्गे तुङ्गस्फटिकरचिताः सन्ति परितो
मराला माणिक्यप्रकरघटितत्रोटिचरणाः ।
सुहृद्बुद्ध्या हंसाः कलितमधुरस्त्वाम्बुजभुवः
समर्य्यादा येषां सपदि परिचर्य्यां विदधति ॥ ४२ ॥

प्रसरन् यः प्रेमानन्दप्रकरः प्रेमानन्दसमूहः तस्य लहर्य्यां तरङ्गेण चुम्बिता आक्रान्ता धीर्यासां तथोक्ताः आभीरीणां गोपीनां सङ्कटस्य सङ्घस्य शिरःसु न्यस्ता अर्पिता विपदः दुःखानीति भावः याभिः तथाभूताः पौरवनिताः पुरनार्य्यः तव अक्ष्णोश्चक्षुषोः आनन्दं पुरा विदधति जनयिष्यन्तीत्यर्थः, पुरायोगे भव्ये लट्प्रयोगः ॥ ४० ॥

अथेति । अथ अनन्तरं यत्र पुरि क्रमघटनया क्रमानुसारेण पुरीमध्ये विशिखा रथ्या, रथ्या प्रतोली विशिखेत्यमरः । सङ्कटतरान् निविडानित्यर्थः वृष्णीनां यादवविशेषाणां निवासान् क्रामं क्रामम् अतीत्य अतीत्य मुरारातेः कृष्णस्य अन्तःपुरवरम् अन्तःपुरश्रेष्ठं स्थगितम् आच्छादितं गगनं याभिः तथाभूताभिः पताकाभिः वैजयन्तीभिः सन्तर्पितं प्रीणितं भुवनं जगत् येन तथाभूतं यत् विजयते सर्वोत्कर्षेण वर्त्तते तत् अनुसरेत्यन्वयः ॥ ४१ ॥

यदिति । यस्याः पुरः उत्सङ्गे क्रोडे मध्ये इति भावः तुङ्गेन उच्चता स्फटिकेन रचिताः निर्मिताः माणिक्यप्रकरेण माणिक्यनिचयेन घटिताः रचिताः त्रोटयः चञ्चवः चरणाश्च येषां तथोक्ताः मरालाः हंसाः परितः समन्तात् सन्ति तिष्ठन्ति, कलिता प्राप्ता मधुरा मधुरा येन तथाभूतस्य कृष्णदर्शनार्थं मथुरामागतस्येत्यर्थः अम्बु-

चिरान्मृग्यन्तीनां पशुपरमणीनामपि कुलै-
रलब्धं कालिन्दीपुलिनविपिने लीनमभितः।
मदालोकोल्लासिस्मितपरिचितास्यं प्रियसखि!
स्फुरन्तं वीक्षिष्ये पुनरपि किमग्रे मुरभिदम्॥ ४३॥
विषादं मा कार्षीर्द्रुतमवितथव्याहृतिरसौ
समागन्ता राधे! धृतनवशिखण्डस्तव सखा।
इति ब्रूते यस्यां शुकमिथुनमिन्द्रानुजकृते
यदाभीरीवृन्दैरुपहृतमभूदुद्धवकरे॥ ४४॥

युग्मकम्।

जभुवः ब्रह्मणः हंसाः वाहनभूता इति भावः समर्य्यादाः मर्य्यादाशालिनः सदाचारविद इति भावः अतएव सुहृद्बुद्ध्या बन्धुबोधेन सपदि तत्क्षणम् आगमनेति भावः येषां स्फटिकरचितहंसानां परिचर्य्यां सेवां विदधति कुर्वन्ति॥ ४२॥

चिरादिति विषादमिति च। हे प्रियसखि! चिरात् मृग्यन्तीनाम् अन्विष्यन्तीनां पशुपरमणीनां गोपाङ्गनानां कुलैः अपि अलब्धम् अप्राप्तं कालिन्दीपुलिने यमुनासैकते यत् विपिनं वनं तस्मिन् अभितः सर्वतः लीनं निभृतस्थितमित्यर्थः मम आलोकात् दर्शनात् उल्लासि विकसत् यत् स्मितं मन्दहसितं तेन परिचितं ज्ञातम् आस्यं वदनं यस्य तथाभूतम् अग्रे समक्षं स्फुरन्तं राजन्तं मुरभिदं पुनरपि किं वीक्षिष्ये द्रक्ष्यामि? इति प्रश्नः। हे राधे! विषादं शोकं मा कार्षीः न कुरु, अवितथा सत्या व्याहृतिः वचनं यस्य तथोक्तः सत्यवादीत्यर्थः धृतनवशिखण्डः नूतनमयूरपिच्छधारी असौ तव सखा द्रुतं शीघ्रं समागन्ता समागमिष्यति। इन्द्रानुजस्य कृष्णस्य कृते निमित्तं तस्य प्रदानार्थमिति भावः आभीरीवृन्दैः गोपनारीसमूहैः उद्धवस्य अस्मत्सान्त्वनाय कृष्णादेशात् आगतस्येति भावः करे हस्ते उपहृतं सम-

घनश्यामा भ्राम्यत्युपरि हरिहर्म्यस्य शिखिभिः
कृतस्तोत्रा मुग्धैरगुरुजनिता धूमलतिका ।
तदालोकाद्धीर ! स्फुरति तव चेन्मानसरुचि-
र्जितं तर्हि स्वैरं जनसहनिवासप्रियतया ॥ ४५ ॥
ततो मध्येकक्षं प्रतिनवगवाक्षस्तवकितं
चलन्मुक्तालम्बस्फुरितममलस्तम्भनिवहम् ।
भवान् द्रष्टा हैमोल्लिखितदशमस्कन्धचरितै-
र्लसद्भित्तिप्रान्तं मुरविजयिनः केलिनिलयम् ॥ ४६ ॥

र्पितं शुकमिथुनं यस्यां पुरि इति इत्थं नूनं कथयति । युग्मम् ॥ ४३ ॥ ४४ ॥

घनश्यामेति । हरेः कृष्णस्य यत् हर्म्यं सदनं तस्य उपरि घनश्यामा मेघवत् श्यामवर्णा अतएव मुग्धैः मूढैः अमेघं मेघं जानद्भिरिति भावः शिखिभिः मयूरैः कृतं स्तोत्रं स्तवनं यस्याः तथोक्ता मयूराणां मेघोदयातीवोल्लासकत्वादिति भावः अगुरुभिः चन्दनविशेषैः जनिता धूमलतिका धूमराजिः भ्राजति राजते, भ्राम्यतीति पाठे घूर्णते इत्यर्थः । हे धीर ! तस्याः धूमलतिकायाः आलोकात् दर्शनात् तव चेत् यदि मानसस्य चित्तस्य रुचिः अनुरागः मानसे सरसि रुचिः गमनाभिलाष इत्यर्थः स्फुरति प्रसरति, तर्हि स्वैरं स्वच्छन्दं यथा तथा जनैः सह निवासे अवस्थाने या प्रियता प्रवृत्तिरिति यावत् तया जितं प्रबला सा जनसहनिवासप्रियतेति भावः ॥ ४५ ॥

तत इति । ततः अनन्तरं मध्येकक्षं कक्षायां मध्ये प्रतिनवैः अभिनवैः गवाक्षैः वातायनैः स्तवकितं रञ्जितं चलद्भिः चपलैः वायुसङ्गादिति भावः मुक्तालम्बैः मौक्तिकमालाभिः स्फुरितं राजितम् अमलाः निर्मलाः स्तम्भानां निवहाः सङ्घाः यस्मिन् तथोक्तं हेम्ना

अलिन्दे यस्यास्ते मरकतमयी यष्टिरमला
शयालुर्यां रात्रौ मदकलकलापी कलयति ।
निरातङ्कस्तस्याः शिखरमधिरुह्य श्रमनुदं
प्रतीक्षेथा भ्रातर्वरमवसरं यादवपतेः ॥ ४७ ॥
निविष्टः पल्यङ्के मृदुलतरतूलीधवलिते
त्रिलोकीलक्ष्मीणां ककुदि दरसाचीकृततनुः ।
अमन्दं पूर्णेन्दुप्रतिममुपधानं प्रमुदितो
निधायाग्रे तस्मिन्नुपहितकफोणिद्वयभरः ॥ ४८ ॥
उदञ्चत्कालिन्दीसलिलसुगम्भावुकरुचिः
कपोलान्ते प्रेङ्खन्मणिमकरमुद्रामधुरिमा ।

काञ्चनेन उल्लिखितानि उत्कर्षेण लिखितानि यानि दशमस्कन्धस्य भागवतीयस्येति भावः चरितानि तैः लसन्तः राजन्तः भित्तीनां प्रान्ताः पर्यन्तदेशाः यस्य तादृशं सुरविजयिनः कृष्णस्य केलिनिलयं क्रीड़ागृहं भवान् द्रष्टा द्रक्ष्यति ॥ ४६ ॥

अलिन्दे इति । हे भ्रातः ! यस्य केलिनिलयस्य अलिन्दे मरकतमयी मरकतरचिता अमला यष्टिः दण्डः आस्ते तिष्ठति, रात्रौ रजन्यां मदकलः मदमत्तः कलापी मयूरः शयालुः निद्रातुरः सन् यां यष्टिं कलयति अधितिष्ठति, त्वं निरातङ्कः निर्भयः सन् तस्याः यष्टेः श्रमनुदं श्रमापहं शिखरं अग्रम् अधिरुह्य आश्रित्य यादवपतेः कृष्णस्य वरम् उत्तमम् अवसरं समयं प्रतीक्षेथाः. प्रतीक्षस्व पालयेत्यर्थः ॥ ४७ ॥

निविष्ट इति । मृदुलतरा अतिमृद्वी या तूली तद्वत् धवलिते तस्मिन् पल्यङ्के खट्वायां निविष्टः स्थितः त्रिलोकीलक्ष्मीणां त्रिभुवनश्रियां ककुदि श्रेष्ठायामिति यावत् दरम् ईषत् साचीकृता वक्रीकृता स्थापिता तनुः शरीरं येन तथाभूतः त्रिभुवनश्रीसमुदितोज्ज्वलवपु-

वसानः कौषेयं जितकनकलक्ष्मीपरिमलं
मुकुन्दस्ते साक्षात् प्रमदसुधया सेक्ष्यति दृशौ ॥ ४९ ॥
विकद्रुः पौराणीरखिलकुलवृद्धो यदुपते-
रदूरादासीनो मधुरभणितिर्गास्यति तदा ।
पुरस्तादाभीरीगणभयदनामा स कठिनो
मणिस्तम्भालम्बी कुरुकुलकथां सङ्कलयिता ॥ ५० ॥
शिनीनामुत्तंसः स किल कृतवर्माप्युभयतः

इति भावः प्रमुदितः प्रफुल्लः, अमन्द उदार इत्यर्थः पूर्णेन्दुप्रतिमं पूर्णचन्द्रनिभम् उपधानम् अङ्के निधाय निवेश्य तस्मिन् उपधाने उपहितः अर्पितः कफोणिद्वयस्य कूर्परद्वयस्य भरः येन तथाविधः । उदञ्चत् उद्गच्छत् कालिन्दीसलिलमिव सुभगम्भावुका मनोहारिणी रुचिः कान्तिः यस्य तथाभूतः । कपोलयोः गण्डयोः अन्तःप्रेङ्खन्ती दोलायमाना मणिमकरद्वयोः मणिमयमकरालङ्कारयोः मधुरिमा माधुर्यं यस्य तथाविधः । जितः कनकलक्ष्म्याः काञ्चनश्रियाः परिमलः सौरभं सुयश इति भावः येन तथोक्तं कौषेयं पट्टवसनं वसानः परिदधत् मुकुन्दः कृष्णः साक्षात् मूर्त्तिमत्या प्रमदसुधया त्वद्दर्शनजनितानन्दामृतेनेति यावत् ते तव दृशौ नयने सेक्ष्यति आर्द्रयिष्यति । युग्मम् ॥ ४८ ॥ ४९ ॥

विकद्रुरिति । अखिलकुलेषु वृद्धः स्थविरः मधुरभणितिः मिष्टभाषी विकद्रुर्नाम यादवः तदा तस्मिन् समये यदुपतेः कृष्णस्य अदूरात् आसीनः उपविष्टः सन् गास्यति सङ्कीर्तनं करिष्यति कृष्णपौर-गाथामिति भावः । पुरस्तात् अग्रतः मणिस्तम्भालम्बी मणिमयस्तम्भाश्रितः आभीरीगणानां गोपाङ्गनानां भयदं नाम यस्य तथोक्तः स कठिनः अक्रूर इति यावत् कुरुकुलस्य युधिष्ठिरादेः कथां सङ्कलयिता संकीर्त्तयिष्यति ॥ ५० ॥

शिनीनामिति । शिनेरपत्यानाम् उत्तंसः श्रेष्ठः सात्यकिरि-

प्रणेष्येते बालव्यजनयुगलान्दोलनविधिम् ।
स जानुभ्यामष्टापदभुवमवष्टभ्य भविता
गुरोः शिष्यो नूनं पदकमलसंवाहनरतः ॥ ५१ ॥
विहङ्गेन्द्रो युग्मीकृतकरसरोजो भुवि पुरः
कृताशङ्को भावी प्रजविनि निदेशेऽर्पितमनाः ।
छदद्वन्द्वे यस्य ध्वनति मथुरावासिवटवो
व्युदस्यन्ते सामस्वरकलितमन्योन्यकलहम् ॥ ५२ ॥
न निर्वक्तुं दामोदरपदकनिष्ठाङ्गुलिनख-
द्युतीनां लावण्यं भवति चतुरास्योऽपि चतुरः ।

त्यर्थः स किल स च कृतवर्मा अपि उभयतः उभयोः पार्श्वयोरित्यर्थः, स्थिताविति शेषः बालव्यजनयुगलयोः आन्दोलनविधिं सञ्चालनव्यापारं प्रणेष्येते करिष्येते । सः गुरोः बृहस्पतेः शिष्यः उद्धव इत्यर्थः जानुभ्याम् अष्टापदभुवं स्वर्णकुट्टिमम् अवष्टभ्य अवलम्ब्य नूनं निश्चितं पदकमलयोः संवाहने सेवने रतः आसक्तः भविता ॥ ५१ ॥

विहङ्गेन्द्र इति । विहङ्गानां पक्षिणाम् इन्द्रः गरुड इत्यर्थः युग्मीकृते करसरोजे करकमले येन तथाभूतः बद्धाञ्जलिरित्यर्थः पुरो भुवि अग्रभूतौ समक्षे इत्यर्थः कृताशङ्कः सतर्कमनाः सन् प्रजविनि प्रकृष्टजवशालिनि निदेशे आज्ञायाम् अर्पितं दत्तं मनो येन तथाभूतः भावी भवितेत्यर्थः । यस्य विहङ्गेन्द्रस्य छदद्वन्द्वे पक्षद्वये ध्वनति गमनकाले स्वनति सति मथुरावासिनः वटवः ब्रह्मचारिणः साम्नः वेदस्य स्वरेण कलितं जनितम् अन्योन्यकलहं कश्चित् वदति अयमत्र स्वरः, अपरो वदति नायमत्र स्वर इत्येवं विवाद व्युदस्यन्ते त्यजन्ति श्रवणपथनिरोधादिति भावः ॥ ५२ ॥

नेति । चतुरास्योऽपि चतुर्मुखोऽपि दामोदरस्य कृष्णस्य यत् पदं तस्य या कनिष्ठाङ्गुलिः तस्य ये नखाः तेषां द्युतीनां लावण्यं प्रभा-

तथापि स्त्रीप्रज्ञासुलभतरलत्वादहमसौ
प्रवृत्ता तन्मूर्त्तिस्तवरतिमहासाहसरसे ॥ ५३ ॥
विराजन्ते यस्य व्रजशिशुकुलस्तेयविकल-
स्वयम्भूचूडाग्रैर्लुलितशिखराः पादनखराः ।
क्षणं यानालोक्य प्रकटपरमानन्दविरसः
स देवर्षिर्मुक्तानपि तनुभृतः शोचति भृशम् ॥ ५४ ॥
सरोजानां व्यूहः श्रियमभिलषन् यस्य पदयो-
र्ययौ रागाढ्यानां विधुरमुदवासव्रतविधिम् ।

विशेषं निर्वक्तुं निश्चयेन कथयितुं चतुरः निपुणः शक्त इति यावत् न भवति । तथापि असौ अहं स्त्रीणां प्रज्ञा बुद्धिः तस्याः सुलभं सहजमित्यर्थः, यत् तरलत्वं चापल्यं तस्मात् तस्य दामोदरस्य मूर्त्तेः कलेवरस्य स्तवे या रतिः अनुरागः तस्यां यः महान् साहसरसः साहसित्वगुणः तस्मिन् प्रवृत्ता उद्यता, अन्यमापि अहं चपलत्वात् तद्गुणकीर्त्तने साहसं कृतवतीति भावः ॥ ५३ ॥

विराजन्ते इति । यस्य कृष्णस्य पादनखराः व्रजशिशुकुलस्य गोपबालकवृन्दस्य स्तेयेन अपहरणेन विकलः अप्रतिभ इति यावत् यः स्वयम्भूर्ब्रह्मा तस्य चूडाग्रैः लुलितं स्पृष्टमित्यर्थः शिखरम् अग्रभागो येषां तथाभूताः सन्तः विराजन्ते शोभन्ते, स देवर्षिर्नारदः क्षणम् अल्पकालं यान् पादनखरान् आलोक्य दृष्ट्वा प्रकटेन उत्कटेन अतिशयिनेत्यर्थः परमानन्देन विरसः विरसः खिन्न इति यावत् सन् मुक्तान् मुक्तिं गतानपि तनुभृतः प्राणिनः भृशम् अत्यर्थं शोचति । एतच्चरणारविन्ददर्शनं मुक्तिमपि अगणयित्वा कामयन्ते लोका इति भावः ॥ ५४ ॥

सरोजानामिति । सरोजानां पद्मानां व्यूहः समूहः यस्य कृष्णस्य पादयोः श्रियं कान्तिम् अभिलषन् रागाढ्यानां संसारयास-

हिमं वन्दे नीचैरनुचितविधानव्यसनिनां
यदेषां प्राणान्तं दमनमनुवर्षं प्रणयति ॥ ५५ ॥
रुचीनामुल्लासैर्मरकतमयस्थूलकदली-
कदम्बाहङ्कारं कवलयति यस्योरुयुगलम्।
यदालानस्तम्भद्युतिमवललम्बे बलभृतां
मदादुद्दामानां पशुपरमणीचित्तकरिणाम् ॥ ५६ ॥
सखे! यस्याभीरीनयनशफरीजीवनविधौ
निदानं गाम्भीर्यप्रसरकलिता नाभिसरसी।
अतः कल्पस्यादौ सनकजनकोत्पत्तिवलभी-
गभीरान्तःकक्षाधृतभुवनमम्भोरुहमभूत् ॥ ५७ ॥

कातरतां विधुरम् अशक्यामिति भावः उदवासः जलमध्ये वासः स एव व्रतं नियमः तस्य विधिः तं ययौ प्राप जलवासरूपं तपश्चचारेति भावः। यत् हिमम् अनुवर्षं प्रतिवत्सरम् अनुचितविधानव्यसनिनाम् अशक्यव्यापारनिरतानां कृष्णपदद्वयाभिलाषेण हैमव्रतनिष्ठानां मति भावः एषां सरोजानां प्राणान्तं दमनं शासनं प्रणयति करोति तत् हिमं नीचैः नम्रतया वन्दे युक्तं कृतमनेनेति प्रशंसामीति यावत् ॥ ५५ ॥

रुचीनामिति। यस्य कृष्णस्य ऊरुयुगलं रुचीनां लावण्यानाम् उल्लासैः विकासैः मरकतमयानां स्थूलकदलीकदम्बानां पीवरकदली-समूहानाम् अहङ्कारं कवलयति ग्रसति तादृशकदल्यः यस्योरुयुगलेन साम्यं नायान्तीति भावः। यत् ऊरुयुगलं बलभृता बलवता मदात् कृष्णप्रियताजनिताहङ्कारादित्यर्थः उद्दामानाम् उद्भटानां पशु-परमणीचित्तकरिणां गोपाङ्गनामानसहस्तिनाम् आलानस्तम्भद्युतिं बन्धनस्तम्भकान्तिम् अवललम्बे प्राप ॥ ५६ ॥

सखे इति। हे सखे! यस्य गाम्भीर्यप्रसरेण गभीरताति-

द्युतिं धत्ते यस्य त्रिवलिवलतिकास्फुटतरं
सखे ! दामश्रेणीव्रणपरिचयाभिन्नमुदरम् ।
यशोदा यस्यान्तः सुरनरभुजङ्गैः परिवृतं
मुखद्वारा वारद्वयमवलुलोके त्रिभुवनम् ॥ ५८ ॥
उरो यस्य स्फारं स्फुरति वनमालावलयितं
वितन्वानं तन्वीजनमनसि सद्यो मनसिजम् ।
मरीचीभिर्यस्मिन् रविनिवहतुल्योऽपि वसते
सदा खद्योताभां भुवनमधुरः कौस्तुभमणिः ॥ ५९ ॥

यथेन कथिता युक्ता नाभिसरसी नाभिह्रदः आभीरीणां गोपीनां नयनान्येव शफर्यः क्षुद्रमत्स्यविशेषाः तासां जीवनविधौ जीवन-विधाने निदानं कारणम् । कल्पस्य आदौ सृष्टिप्रारम्भे यतः नाभिसरस्याः सनकजनकस्य ब्रह्मणः उत्पत्तिरेव वल्लभी आधारदाढ्य-विशेषः यस्मात्तथाभूता गभीरा दुरधिगमेत्यर्थः या अन्तःकथा कथान्तरं तस्यां धृतं भुवनं जगत् यत्र तादृशम् अम्भोरुहं पद्मम् अभूत् ॥ ५७ ॥

द्युतिमिति । हे सखे ! यस्य त्रिवलिवलतिका त्रिवलिरूपा या लता तया स्फुटतरं युक्तमिति भावः दामश्रेणीनां रज्जुराजीनां यशोदया कृष्णबन्धनार्थमानीतानामिति भावः व्रणपरिचयस्य क्षतचिह्न-चिह्नस्य अभिन्नम् उदरं द्युतिं कान्तिं धत्ते दधाति, यशोदा यस्य उदरस्य अन्तः अभ्यन्तरे सुरनरभुजङ्गैः देवमानवपन्नगैः परिवृतम् व्याप्तं त्रिभुवनं मुखद्वारा मुखेन वारद्वयम् अवलुलोके अवलोकयाम्-बभूव ॥ ५८ ॥

उर इति । यस्य कृष्णस्य तन्वीजनानां कृशोदरीणां गोपीनां मनसि सद्यः दर्शनमात्रेणेति भावः मनसिजं कामं वितन्वानं प्रकाशयत् वनमालया वलयितं विराजितमिति भावः स्फारं विशालम् उरः

समन्तादुन्मीलद्दलभिदुपलस्तम्भयुगल-
प्रभाजैत्रं केशिद्विजलुलितकेयूरललितम् ।
स्मराक्राम्यद्गोपीपटलहठकण्ठग्रहपरं
भुजद्वन्द्वं यस्य स्फुटसुरभिगन्धं विजयते ॥ ६० ॥
जिहीते साम्राज्यं जगति नवलावण्यलहरी-
परीपाकस्यान्तर्मुदितमदनावेशमधुरम् ।
नटद्भ्रूवल्लीकं स्मितनवसुधाकेलिसदनं
स्फुरन्मुक्तापङ्क्तिप्रतिमरदनं यस्य वदनम् ॥ ६१ ॥

वक्षःस्थलं स्फुरति राजते । मरीचीभिः मयूखैः रविनिवहतुल्यः बहुसूर्यप्रतिमः अतएव भुवनेषु मधुरः मनोहरोऽपि कौस्तुभमणिः यस्मिन् उरसि सदा खद्योततामां खद्योतकान्तिं वहते दधाति उरसः प्रभया तिरोहितत्वादिति भावः ॥ ५९ ॥

समन्तादिति । समन्तात् सर्वतः उन्मीलन्ती स्फुरन्ती दलभिदुपलस्य इन्द्रनीलमणेः स्तम्भयुगलस्य या प्रभा कान्तिः तस्या जैत्रं विजेतृ केशिना द्विजेन लुलितं दष्टं केयूरललितम् अङ्गदभूषितञ्च तत्, स्मरेण कामेन आक्राम्यतां गोपीपटलानां हठेन सहसा यः कण्ठग्रहः कण्ठालिङ्गनं तत्परं तत्र निरतमित्यर्थः स्फुटः सुव्यक्तः सुरभिः शोभनः गन्धो यस्य तादृशं यस्य भुजद्वन्द्वं विजयते सर्वोत्कर्षेण वर्त्तते ॥ ६० ॥

जिहीते इति । अन्तर्मुदितेन विकसितेन मदनावेशेन मधुरं मनोहरं नटन्ती नृत्यन्ती भ्रूवल्ली भ्रूलता यस्मिन् यस्य वा तत्, स्मितमेव नवसुधा तस्याः केलिसदनं क्रीडागृहं स्फुरन् राजन् मुक्तापङ्क्तिप्रतिमः मुक्ताहारनिभः रदनः दन्तः यस्मिन् यस्य वा तादृशं यस्य कृष्णस्य वदनं जगति नवा नूतना या लावण्यलहरी लावण्यतरङ्गः तस्याः परिपाकस्य परीणामस्य साम्राज्यं जिहीते प्राप्नोति ॥ ६१ ॥

किमेभिर्व्याहारैः कथय कथयामि स्फुटमहं
सखे ! निःसन्देहं परिचयपदं केवलमिदम् ।
परानन्दो यस्मिन्नयनपदवीभाजि भविता
त्वया विज्ञातव्यो मधुररव ! सोऽयं मधुरिपुः ॥ ६२ ॥

विलोकेथाः कृष्णं मदकलमरालीरतिकला-
विदग्धव्यामुग्धं यदि पुरवधूविभ्रमभरैः ।
तदा नास्मान् याम्याः श्रवणपदवीं तस्य गमयेः
सुधापूर्णं चेतः कथमपि न तक्रं मृगयते ॥ ६३ ॥

यदा वृन्दारण्यस्मरचललहरीहेतुरमलं
पिकानां वेवेष्टि प्रतिहरितमुच्चैः कुहुरुतम् ।

किमिति । हे सखे ! हे मधुररव ! मिष्टभाषिन् ! एभिः व्याहारैः उक्तैः किम् ? न किमपि प्रयोजनमित्यर्थः । कथय कथय, अहं स्फुटं कथयामि निःसन्देहं निःसंशयं केवलं परिचयपदम् अभिज्ञानचिह्नम् इदं, यस्मिन् जने नयनपदवीभाजि नेत्रगोचरे सति परः महान् आनन्दः भविता, त्वया सोऽयं मधुरिपुः कृष्णः विज्ञातव्यः विशेषेण ज्ञेयः ॥ ६२ ॥

विलोकेथा इति । हे मदकलमरालीरतिकलाविदग्ध ! मदकलहंसीरतिकलाचतुर ! यदि कृष्णं पुरवधूनां नागरिकाणां विभ्रमभरैः विलासातिशयैः व्यामुग्धं विशेषेण आसक्तं विलोकेथाः पश्येः, तदा याम्याः अस्मान् तस्य कृष्णस्य श्रवणपदवीं न गमयेः अस्माकं कथाः तत्समीपे मा वदेति भावः । तथाहि सुधापूर्णम् अमृतास्वादमुदितमिति यावत् चेतः कथमपि तक्रं न मृगयते न वाञ्छति । अर्थान्तरन्यासः ॥ ६३ ॥

यदेति । यदा वृन्दारण्यस्य स्मरचललहरी स्मरतरङ्गः तस्याः हेतुः कारणभूतम् अमलं मधुरं पिकानां कोकिलानाम् उच्चैः कुहुरुतं

वहन्ते वा वाताः स्फुरितगिरिमल्लीप्रविमला-
स्तदैवास्माकीनां गिरमुपहरेथा मुरभिदि ॥ ६४ ॥
पुरा तिष्ठन् गोष्ठे निखिलरमणीभ्यः प्रियतया
भवान् यस्यां गोपीरमण ! विदधे गौरवभरम् ।
सखी तस्या विज्ञापयति ललिता धीरललित !
प्रणम्य श्रीपादाम्बुजकनकपीठोपरिसरे ॥ ६५ ॥
प्रयत्नाद्दामाख्यं नवकमलिनीपल्लवकुलै-
स्त्वया भूयो यस्याः क्षतमहह संवर्धनमभूत् ।
चिरादूधोभारस्फुरदवरिमाक्रान्तजघना
बभूव प्रष्ठौही मुरमथन ! सेयं कपिलिका ॥ ६६ ॥

प्रतिस्फुरितं प्रतिदिशं वेवेष्टि पुनः पुनः ध्वनतीत्यर्थः, स्फुरिताभि-र्विकसिताभिः गिरिमल्लीभिः प्रविमलाः अतिसुरभयः वाताः वा वहन्ते, तदैव आस्माकीनां गिरं वाचं मुरभिदि कृष्णे उपहरेथाः प्रापयेः ॥ ६४ ॥

पुरेति । हे गोपीरमण ! भवान् पुरा पूर्वं गोष्ठे तिष्ठन् निखिलरमणीभ्यः सर्वगोपाङ्गनाभ्यः प्रियतया वल्लभतया यस्यां गोपाङ्गनायां राधायामित्यर्थः गौरवभरं सम्मानातिशयं विदधे चकार, हे धीरललित ! निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यादित्युक्तलक्षणनायक इत्यर्थः तस्याः राधायाः सखी ललिता श्रीपादाम्बुजयोः भवच्चरणारविन्दयोः यत् कनकपीठं तस्य उपरिसरे उपरिभागे प्रणम्य प्रकर्षेण नत्वा विज्ञापयति ॥ ६५ ॥

प्रयत्नादिति । हे मुरमथन ! मुरारे ! त्वया आत्मानम् दामैवं प्रयत्नात् प्रकृष्टं यत्नमाश्रित्येत्यर्थः नवकमलिनीनां पल्लव-कुलैः पत्रनिचयैः यस्याः भूयः पुनः पुनः संवर्धनं सम्यक् पालनं कृतम् अभूत्, अहह खेदे, सेयं प्रष्ठौही प्रथमगर्भिणी कपिलिका

समीपे नीपानां विचतुरदला हन्त गमिता
त्वया माकन्दस्य प्रियसहचरी भावनियतिम् ।
इयं सा वासन्ती गलदमलमाध्वीकपटली-
मिषाद्द्ये गोपीरमण ! रुदती रोदयति नः ॥ ६७ ॥
प्रसूतो देवक्या मुरमथन ! यः कोऽपि पुरुषः
स जातो गोपालाभ्युदयपरमानन्दवसतिः ।
धृतो यो गान्दिन्या कठिनजठरे सम्प्रति ततः
समन्तादेवास्तं शिव शिव गता गोकुलकथा ॥ ६८ ॥

कपिलाधेनुः अधोभारस्य स्तनभारस्य आस्फुरणेन सम्यक्वर्द्धनेन यः गरिमा गौरवं तेन आक्रान्तं जघनं कटिपुरोभागः यस्याः तथाभूता बभूव ॥ ६६ ॥

समीपे इति । हे गोपीरमण ! नीपानां कदम्बानां समीपे विचतुरदला निर्गतविचतुरपत्रा वासन्ती माधवीलता त्वया माकन्दस्य चूतस्य प्रियसहचरीभावे नियतिं स्थितिं गमिता प्रापिता, हन्त खेदे, सेयं वासन्ती अद्य अस्माकं समक्षमित्यर्थः गलन्ती क्षरन्ती अमला या माध्वीकपटली मकरन्दराजिः सा एव मिषं व्याजः तस्मात् रुदती सती नः अस्मान् रोदयति क्रन्दयति । अपह्नुतिरलङ्कारः ॥ ६७ ॥

प्रसूत इति । हे मुरमथन ! मुरारे ! देवक्याः प्रसूतः यः कोऽपि पुरुषः, सः गोपालानाम् अभ्युदयस्य परमानन्दस्य च वसतिः स्थानम् तेन गोपाला अभ्युदयं परमानन्दञ्च नीताः इति भावः । यः गान्दिन्या कठिने जठरे उदरे धृतः, सम्प्रति ततः तस्मात् अक्रूरादित्यर्थः समन्तात् एव गोकुलस्य कथा वार्त्ता अस्तं गता नाशं प्राप्ता अक्रूरेणैव गोकुलं विध्वस्तमिति भावः । शिव शिवेति खेदसूचकम् ॥ ६८ ॥

अरिष्टेनाहूताः पशुपसुहृदो यान्ति विपदं
तृणावर्त्ताक्रान्त्या रचयति भयं वत्सरचयः ।
अमी व्योमीभूता व्रजवसतिभूमीपरिसरा
वहन्ति नस्तापं मुरहर ! विदूरं त्वयि गते ॥ ६९ ॥
त्वया नागन्तव्यं कथमिह हरे ! गोष्ठमधुना
लताश्रेणी वृन्दावनभुवि यतोऽभूद्विषमयी ।
प्रसूनानां गन्धं कथमितरथा वातनिहितं
भजन् सद्यो मूर्च्छां वहति निवहो गोपसुदृशाम् ॥७०॥
कथं सङ्गोऽस्माभिः सह समुचितः सम्प्रति हरे !
वयं ग्राम्या नार्य्यस्त्वमसि नृपकन्यार्चितपदः ।

अरिष्टेनेति । हे मुरहर ! त्वयि विदूरं गते सति अरिष्टेन तदाख्येन असुरेण आहूताः पशुपानां गोपानां सुहृदः स्वजनाः विपद् यान्ति प्राप्नुवन्ति । वत्सरचयः वत्सनिचयः तृणावर्त्तस्य तदाख्यस्य असुरस्य आक्रान्त्याः परिभवात् भयं रचयति करोति, अमी व्योमीभूताः शून्यीभूताः व्रजवसतिभूमिपरिसराः वृन्दावनभूप्रदेशाः नः अस्माकं तापं वहन्ति जनयन्ति दुरवस्थादर्शनेनेति भावः ॥ ६९ ॥

त्वयेति । हे हरे ! अधुना त्वया कथमपि इह वृन्दावने गोष्ठं गोचारणस्थानं न आगन्तव्यम् । यतः यस्मात् वृन्दावनभुवि लताश्रेणी विषमयी अभूत्, इतरथा अन्यथा यदि विषमयी न स्यात्तदेति भावः गोपसुदृशां गोपाङ्गनानां निवहः समूहः वातेन वायुना निहितम् आनीतं प्रसूनानां तत्तल्लताजातानामिति भावः पुष्पाणां गन्धं भजन् आजिघ्रन् सद्यः तत्क्षणं मूर्च्छां वहति प्राप्नोति ॥ ७० ॥

कथमिति । हे हरे ! सम्प्रति अस्माभिः सह सङ्गः ते इति

गतः कालो यस्मिन् पशुपरमणीसङ्गमकृते
भवान् अन्धस्तस्थौ तमसि गृहवाटीविटपिनः ॥ ७१ ॥

वयं त्यक्ताः स्वामिन्! यदिह तव किं दूषणमिदं
निसर्गः श्यामानामयमतितरां दुष्परिहरः ।
कुहूकण्ठैरण्डावधिसहनिवासात् परिचिता
विसृज्यन्ते सद्यः कलितनवपक्षैर्बलिभुजः ॥ ७२ ॥

अयं पूर्वो रङ्गः किल विरचितो यस्य तरसा
रसाढ्याख्यातव्यं परिकलय तन्नाटकमिदम् ।

शेषः कथं समुचितः ? नैवेत्यर्थः । यतः वयं ग्राम्याः ग्रामवासिन्यः अविदग्धा इति भावः नार्य्यः, त्वं नृपकन्याभिः राजकुमारीभिः अर्चितपदः सेवितचरणः असि । स कालः गतः, यस्मिन् काले भवान् पशुपरमणीनां गोपीनां सङ्गमकृते सङ्गमार्थं अन्धः सन्तृष्णः सन् गृहवाट्यां यो विटपी वृक्षः तस्य तमसि अन्धकारे सतिमिरे तत्तले इति यावत् तस्थौ स्थितः ॥ ७१ ॥

वयमिति । हे स्वामिन् नाथ ! यत् यदि वयं त्यक्ताः त्वयेति शेषः, इह जगति तव इदम् अस्मत्त्यागरूपं कार्य्यं किं दूषणम् ? न दूषणमित्यर्थः । श्यामानां मलिनात्मकानामिति ध्वनिः अयं निसर्गः स्वभावः अतितराम् अतिशयेन दुष्परिहरः अहार्य्यः अपरित्याज्य इत्यर्थः, तथाहि कुहूकण्ठैः कोकिलैः श्यामैरिति भावः कलितनवपक्षैः धृतनूतनपक्षैः सद्भिः अण्डावधिसहनिवासात् आशैशवादिति च ध्वनिः परिचिताः बलिभुजः काकाः सद्यः उड्डयनशक्तिप्राप्तिमात्रमेवेति भावः विसृज्यन्ते परित्यज्यन्ते ॥ ७२ ॥

अयमिति । यस्य नाटकस्य अभिनेयस्य वस्तुनः अयं पूर्वो रङ्गः मङ्गलाचरणरूपाङ्गविशेषः । तदुक्तं दर्पणे, यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये । कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ॥ इति तरसा

मया प्रष्टव्योऽसि प्रथममिति वृन्दावनपते !
किमाहो राधेति स्मरसि कृपणं कर्णयुगलम् ॥ ७३ ॥
अये कुञ्जद्रोणीकुहरगृहमेधिन् ! किमधुना
परोक्षं वक्ष्यन्ते पशुपरमणीदुर्नियतयः ।
प्रवीणा गोपीनां तव चरणपद्मेऽर्पितमना
ययौ राधा साधारणसमुचितप्रश्नपदवीम् ॥ ७४ ॥
त्वया गोष्ठं गोष्ठीतिलक ! किल चेद्विस्मृतमिदं
न तूर्णं धूमोर्णापतिरपि विधत्ते यदि कृपाम् ।
अहह न्दं वृन्दावनकुसुमपालीपरिमलै-
र्दुरालोकं शोकास्पदमथ कथं नेष्यति सखी ॥ ७५ ॥

संक्षेपेणेति भावः विरचितः वर्णितः किल मयेति शेषः । इदानीं रंसात् रसमाश्रित्य आख्यातव्यं वाच्यं तस्य पूर्वरङ्गम् इदं नाटकम् अभिनेयं वस्तु परिकलय अवधारय दृष्टवित्यर्थः । हे वृन्दावनपते ! मया इति प्रथमं प्रष्टव्यः असि, कृपणम् अस्मरणेन दीनमित्यर्थः तव कर्णयुगलं राधेति नाम किमाहो किमिति स्मरसि ? ॥७३॥

अये इति । अये कुञ्जमेव द्रोणीकुहरं द्रोणीविवरं तदेव गृहं तेन मेधते संगच्छते इति तथोक्तः तत्सम्बुद्धौ, अधुना इदानीं पशुपरमणीनां गोपीनां दुर्नियतयः दुर्भाग्यानि किं वक्ष्यन्ते ? न किमपि वक्तव्या इत्यर्थः, तव चरणपद्मे अर्पितमना गोपीनां प्रवीणा श्रेष्ठा राधा अपिरत्नाध्याहार्य्यः । साधारणस्य सामान्यस्य समुचितः यः प्रश्नः तस्य पदवीं स्थानम् असाधारणाणीति भावः ययौ प्राप । सर्वैरादृतापि या न केनापि अधुना आद्रियते इति भावः ॥ ७४ ॥

त्वयेति । गोष्ठीतिलक ! त्वया चेत् यदि इदं गोष्ठं विस्मृतं किल, यदि च धूमोर्णापतिः यमः अपि तूर्णं शीघ्रं कृपां न विधत्ते न करोति, अथ तदा सखी राधा वृन्दावने याः कुसुमानां पाल्यः

तरङ्गैः कुर्वाणा शमनभगिनीलाघवमसौ
नदीं काञ्चिद्गोष्ठे नयनजलपूरैरजनयत् ।
इतीवास्या द्वेषादभिमतदयाप्रार्थनमयीं
मुरारे ! विज्ञप्तिं नियमयति मानी न शमनः ॥७६॥
कृताकृष्टिक्रीडं किमपि तव रूपं मम सखी
सकृद् दृष्ट्वा दूरादहितहितबोधोज्झितमतिः ।
हताशेयं प्रेमानलमनुविशन्ती सरभसं
पतङ्गीवात्मानं मुरहर ! मुहुर्दाहितवती ॥ ७७ ॥
मया वाच्यः किं वा त्वमिह निजदोषात् परमसौ
ययौ मन्दा वृन्दावनकुमुदबन्धो ! विधुरताम् ।

राजयः तासां परिमलैः सौरभैः दुरालोकं दुर्दर्शम् अतएव शोकास्पदम् [illegible] दिवसचयं कथं नेष्यति गमयिष्यति ॥ ७५ ॥

नदीमिति । हे मुरारे ! असौ राधा तरङ्गैः शमनभगिन्याः यमुनायाः लाघवम् अभिभवजनितमिति भावः कुर्वाणा गोष्ठे नयनजलपूरैः काञ्चित् नदीम् अजनयत् । इतीव अस्याः राधायाः द्वेषात् भगिनीपरिभवजनितादिति भावः मानी शमनः अभिमतदया मृत्युदया तत्प्रार्थनमयीं विज्ञप्तिं विज्ञापनं न नियमयति न शृणोति ॥ ७६ ॥

कृताकृष्टिक्रीडमिति । हे मुरहर ! हताशा दुराशा इयं मम सखी कृता आकृष्ट्या आकर्षणेन क्रीडा येन तथाभूतं तव किमपि रूपं सकृत् दृष्ट्वा दूरात् अत्यर्थम् अहिताहितयोर्बोधेन उज्झिता हीना मतिर्यस्यास्तथोक्ता हिताहितज्ञानशून्येत्यर्थः पतङ्गीव सरभसं सवेगं प्रेमानलम् अनुविशन्ती प्रविशन्ती आत्मानं मुहुः पुनः पुनः दाहितवती ॥ ७७ ॥

मयेति । हे वृन्दावनकुमुदबन्धो ! वृन्दावनचन्द्र ! मया त्वं

यदर्थं दुःखाग्निर्दहति न तमद्यापि हृदयात्
न यस्माद् दुर्मेधा क्षणमपि भवन्तं द्रवयति ॥ ७८ ॥
त्रिवक्राहो धन्या हृदयमिव ते स्वं वपुरियं
समासाद्य स्वैरं यदिह विलसन्ती निवसति ।
ध्रुवं पुण्यभ्रंशादजनि सरलेयं मम सखी
प्रवेशस्तत्रासीत् क्षणमपि यदस्या न सुलभः ॥ ७९ ॥
किमाविष्टा भूतैः सपदि यदि वा क्रूरफणिना
क्षतापस्मारेण च्युतमतिरकस्मात् किमपतत् ।
इति व्यग्रैरस्यां गुरुभिरभितो वेणुनिनद-
श्रवाद् विभ्रष्टायां मुरहर ! विकल्पा विदधिरे ॥ ८० ॥

किं वा वाच्यः वक्तव्यः, असौ मन्दा मूढ़ा मत्सखी इह वृन्दावने परं केवलं निजदोषात् विधुरतां व्याकुलतां ययौ । यदर्थं यस्य भवतः निमित्तं दुःखाग्निः दहति हि तापयत्येव, दुर्मेधा दुर्मतिरियम् अद्यापि यस्मात् तं भवन्तं क्षणमपि अल्पमपि हृदयात् न द्रवयति न दूरीकरोति । हृदयात्तव दूरीकरणे न तस्याः सन्तापः, सा तु तत् कर्त्तुमशक्तेतीदृशी विधुरा जातेति भावः ॥ ७८ ॥

त्रिवक्रेति । अहो त्रिवक्रा त्रिषु स्थानेषु वक्रा कुब्जेयं धन्या पुण्यवती, यत् यतः इयं त्रिवक्रा इह मथुरायां हृदयमिव ते तव स्वं वपुः शरीरं त्रिभङ्गमिति भावः समासाद्य प्राप्य स्वैरं स्वच्छन्दं विलसन्ती विहरन्ती सती निवसति । इयं मम सखी पुण्यभ्रंशात् सुकृतक्षयात् सरला अजनि जाता, ध्रुवम् उत्प्रेक्षे, मन्ये शङ्के ध्रुवं प्रायोनूनमित्येवमादयः । उत्प्रेक्षावाचकाः शब्दा इवशब्दोऽपि तादृशः ॥ इति दर्पणः । यत् यतः अस्याः मत्सख्याः तत्र मथुरायां तव हृदये वा क्षणमपि प्रवेशः न सुलभः आसीत् ॥७९॥

किमिति । हे मुरहर ! अस्यां मत्सख्यां राधायां वेणुनिन-

नवीनेयं सम्प्रत्यकुशलपरीपाकलहरी
नरीनर्त्ति स्वैरं मम सहचरीचित्तकुहरे।
जगन्नेत्रश्रेणी-मधुरमथुरायां निवसत-
श्चिरादार्त्ता वार्त्तामपि तव यदेषा न लभते ॥ ८१ ॥

जनान् सिद्धादेशान् नमति भजते मान्त्रिकगणान्
विधत्ते शुश्रूषामधिकविनयेनौषधिविदाम्।
त्वदीक्षादीक्षायै परिचरति भक्त्या गिरिसुतां
मनीषा हि व्यग्रा किमपि सुखहेतुं न मनुते ॥ ८२ ॥

दुःश्रवात् वंशीरवश्रवणात् विभ्रष्टायां पतितायां सत्यां व्यग्रैः व्यस्तैः गुरुभिः श्वश्र्वादिभिः अभितः समन्तात् इति विकल्पाः तर्काः विदधिरे कृताः। विकल्पप्रकारानाह किमिति, इयं भूतैः वेतालैः आविष्टा किम्, यदि वा अथवा क्रूरफणिना कृष्णसर्पेण क्षता दष्टा, वा अपस्मारेण तदाख्यरोगविशेषेण च्युतमतिः सती सपदि सहसा अपतत् किम्? ॥ ८० ॥

नवीनेति। सम्प्रति मम सहचर्य्याः सख्याः चित्तकुहरे मनोविवरे नवीना नूतना इयम् अकुशलपरीपाकलहरी अमङ्गलपरिणामतरङ्गः स्वैरं स्वच्छन्दं नरीनर्त्ति पुनः पुनः नृत्यति स्फुरतीत्यर्थः। यत् यतः एषा मत्सखी आर्त्ता व्याकुला जगतां नेत्रश्रेण्या मधुरा मनोहारिणी या मथुरा तस्यां तव निवासादिति भावः अथवा जगन्नेत्रश्रेणीमधुर इति पृथक् सम्बोधनपदम्। निवसतः तव चिरात् दीर्घकालादपि वार्त्तां न लभते न प्राप्नोति ॥ ८१ ॥

जनानिति। सिद्ध आदेशो येषां तान् सफलादेशानित्यर्थः जनान् सिद्धपुरुषानित्यर्थः नमति, मान्त्रिकगणान् मन्त्रज्ञगणान् भजते सेवते, औषधिविदाम् अधिकविनयेन शुश्रूषां सेवां विधत्ते करोति, तव ईक्षा दर्शनमेव दीक्षा व्रतं तस्यै तव दर्शनलाभायेति

पशूनां पातारं भुजगरिपुपत्रप्रणयिनं
स्मरोद्वर्तिक्रीडं निविडघनसारद्युतिहरम्।
सदाभ्यर्णे नन्दीश्वरगिरिभुवो रङ्गरसिकं
भवन्तं कंसारे! भजति भवदाप्त्यै मम सखी ॥ ८३ ॥
भवन्तं सन्तप्ता विदलिततमालाङ्कुररसै-
र्विलिख्य भ्रूभङ्गीकृतमदनकोदण्डकदनम्।
निधास्यन्ती कण्ठे तव निजभुजावल्लरिमसौ
धरण्यामुन्मीलज्जडिमनिविडाङ्गी विलुठति ॥ ८४ ॥

भावः भक्त्या गिरिसुतां गौरीं परिचरति आराधयति। हि तथाहि व्यथा विधुरा मनीषा बुद्धिः सुखकृतं सुखस्य कार्यं किमपि न मनुते व्याधारयति ॥ ८२ ॥

पशूनामिति। हे कंसारे! मम सखी भवदाप्त्यै त्वत्प्राप्तये पशूनां पातारं पशुपतिं भुजङ्गानां रिपुर्गरुडः स एव पत्रं वाहनं यस्य सः भुजगरिपुपत्रः हरिरित्यर्थः तस्य प्रणयिनं सखायं स्मरस्य कामस्य उद्वर्तिनी उद्दीपिनी नाशिनी वा क्रीडा यस्य तथोक्तं निविडः सान्द्रः यः घनसारश्चन्दनं तस्य द्युतिहरं श्वेताङ्गमित्यर्थः सदा नन्दीश्वरगिरिभुवोः नन्दिपार्वत्योः अभ्यर्णे समीपे रङ्गरसिकं तं भवं हरं भजति सेवते ॥ ८३ ॥

भवन्तमिति। सन्तप्ता असौ मम सखी विदलितस्य भग्नस्य तमालाङ्कुरस्य रसैः भ्रूभङ्ग्या कृतं मदनकोदण्डस्य कामकार्मुकस्य कदनं परिभवः येन तं भवन्तं विलिख्य विशेषेण चित्रयित्वेत्यर्थः तव चिन्तितस्येति भावः कण्ठे निजभुजवल्लरिं स्वबाहुमञ्जरीं निधास्यन्ती अर्पयिष्यन्ती धरण्यां भूमौ उन्मीलता प्रसरता जडिम्ना जाड्येन निविडं व्याप्तमित्यर्थः अङ्गं यस्याः तथाभूता सती विलुठति ॥ ८४ ॥

कदाचिन्मूढ़ेयं निविड़भवदीयस्मृतिमदा-
दमन्दादात्मानं कलयति भवन्तं मम सखी ।
तथास्या राधाया विरहदहनाकल्पितधियो
मुरारे ! दुःसाधा क्षणमपि न बाधा विरमति ॥ ८५ ॥

त्वया सन्तापानामुपरि परिमुक्तापि रभसा-
दिदानीमापेदे तदपि तव चेष्टां प्रियसखी ।
यदेषा कंसारे ! भिदुरहृदयं त्वामवयती
सतीनां मूर्द्धन्या भिदुरहृदयाऽभूदनुदिनम् ॥ ८६ ॥

समक्षं सर्वेषां निवससि समाधिप्रणयिनाम्
इति श्रुत्वा नूनं गुरुतरसमाधिं कलयति ।

कदाचिदिति । कदाचित् मूढ़ा इयं मम सखी अमन्दात् अत्य-
न्तात् निविड़ा सान्द्रा या भवदीया स्मृतिः तया यो मदः आनन्दः
तस्मात् आत्मानं भवन्तं कलयति मनसा भावयतीत्यर्थः । हे मुरारे !
तथा किन्तु, तस्माद्धेतोर्वा विरहदहनेन विच्छेदाग्निना आकल्पिता
विविधकल्पनां नीता धीर्बुद्धिर्यस्यास्तथाभूतायाः अस्या राधायाः दुःसाधा
दुष्प्रतिविधेया बाधा मनःसन्तापः क्षणमपि न विरमति न निव-
र्त्तते ॥ ८५ ॥

त्वयेति । हे कंसारे ! प्रियसखी राधा त्वया रभसात् वेगात्
सन्तापानाम् उपरि सन्तापसागरे इति भावः परित्यक्ता त्यक्ता पाति-
तेत्यर्थः । तदपि तथापि इदानीमपि एवमवस्थायामपि तव चेष्टां
त्वत्प्राप्तिप्रयासम् आपेदे प्राप । यत् यस्मात् एषा सतीनां मूर्द्धन्या
साध्वीप्रवरा मत्सखी भिदुरं मग्नम् अननुरक्तमिति भावः हृदयं
यस्य तथाभूतं त्वाम् अवयती अवगच्छन्ती अनुदिनं भिदुरहृदया
विदीर्णहृदया अभूत् ॥ ८६ ॥

समक्षमिति । हे कंसाराते ! त्वं सर्वेषां समाधिप्रणयिनां

सदा कंसाराते ! भजसि यमिनां नेत्रपदवीम्
इति व्यक्तं सज्जीभवति यमश्चालम्बितुमपि ॥ ८७ ॥
मुरारे ! कालिन्दीसलिलचलदिन्दीवररुचे !
मुकुन्द ! श्रीवृन्दावनमदन ! वृन्दारकमणे ! ।
व्रजानन्दिन् ! नन्दीश्वरदयित ! नन्दात्मज ! हरे !
सदेति क्रन्दन्ती परिजनशुचं कन्दलयति ॥ ८८ ॥
समन्तादुत्तप्तस्तव विरहदावाग्निशिखया
कृतोद्वेगः पञ्चाशुगमृगयुवेधव्यतिकरैः ।
तनूभूतं सद्यस्तनुवनमिदं हास्यति हरे !
हठादद्य श्वो वा मम सहचरी प्राणहरिणः ॥ ८९ ॥

योगिनामित्यर्थः समक्षं निवससि, इति श्रुत्वा गुरुतरधर्माधिं सह्याम योगं कलयति अभ्यस्यति नूनमुत्प्रेक्षे । यम सदा यमिनां बाह्येन्द्रियनिग्रहवतां नेत्रपदवीं भजसि नयनगोचरो भवसि इति हेतोः यमम् बाह्येन्द्रियनिग्रहम् अन्तर्कामिति ध्वनिः । आलम्बितुम् आश्रयितुमपि सज्जीभवति यतते इति व्यक्तम् उत्प्रेक्षे ॥ ८७ ॥

मुरारे इति । हे मुरारे ! हे श्रीवृन्दावनमदन ! हे वृन्दारकमणे देवश्रेष्ठ ! हे व्रजानन्दिन् गोकुलानन्दन ! हे नन्दीश्वरदयित हरवल्लभ ! हे नन्दात्मज ! हे हरे ! सदा इति क्रन्दन्ती सखी परिजनानाम् अस्माकं शुचं शोकं कन्दलयति वर्द्धयति ॥ ८८ ॥

समन्तादिति । हे हरे ! तव विरहदावाग्निशिखया समन्तात् उत्तप्तः सन्तापित इति यावत् पञ्चाशुगः पञ्चशरः काम एव मृगयुः व्याधः तस्य वेधव्यतिकरैः शरप्रहारसमूहैः कृतोद्वेगः जनितपीडः मम सहचर्य्याः प्राणहरिणः हठात् सहसा अद्य श्वो वा तनूभूतं कृशीभूतम् अतिक्षीणमित्यर्थः इदं तनुवनं शरीरारण्यं सद्यः झटिति हास्यति त्यक्ष्यति ॥ ८९ ॥

पयोराशिस्फीतत्विषि हिमकरोत्तंसमधुरे
दधाने दृग्भङ्ग्या स्मरविजयिरूपं मम सखी ।
हरे दत्तस्वान्ता भवति तदिमां किं प्रभवति
स्मरो हन्तुं किन्तु व्यथयति भवानेव कुतुकी ॥ ९० ॥
विजानीषे भावं पशुप-रमणीनां यदुपते !
न जानीमः कस्मात् तदपि बत मायां रचयसि ।
समन्तादध्यात्मं यदिह पवनव्याधिरलपद्
बलादस्यास्तेन व्यसनकुलमेव द्विगुणितम् ॥ ९१ ॥

पयोराशीति । हे हरे ! मम सखी पयसां दुग्धानां राशिः समूहः तद्वत् स्फीताः प्रवृद्धाः त्विषः कान्तयः यस्य तथाभूते धवलकाये इत्यर्थः; हिमकरश्चन्द्र एव उत्तंसः शिरोभूषणं तेन मधुरे मनोहरे चन्द्रशेखरे इति यावत्, दृशो कटाक्षनेत्रस्य भङ्ग्या विकारेण स्मरविजयिरूपं दधाने धारयति हरे दत्तं स्वान्तं मनो यया तथाभूता भवति, तत् तस्मात् स्मरः कामः इमां मत्सखीं स्मरहरसेविनीमिति भावः हन्तुं किं प्रभवति ? समर्था भवति किम् ? नैवेत्यर्थः । किन्तु कुतुकी कौतुकवान् एतादृशावस्थायामपि परिहासशील इत्यर्थः भवानेव व्यथयति पीडयति ॥ ९० ॥

विजानीषे इति । हे यदुपते ! त्वं पशुपरमणीनां गोपाङ्गनानां भावम् आशयं विजानीषे विशेषेण बुध्यसे । तदपि कस्मात् मायां छलनां रचयसि करोषि, न जानीमः बत खेदे । पवनव्याधिरुद्धवः इह समन्तात् यत् अध्यात्मं परमात्मतत्त्वम् अधिकृत्य अलपत् कृष्णः परमात्मा, तस्मिन् भवतोभिन्नानवबुद्धिर्न कार्य्या इत्यादिरूपमकथयत् तेन अध्यात्मवादेन अस्याः मत्सख्याः बलात् वेगेन व्यसनकुलमेव शोकनिचय एव द्विगुणितं द्विरावृत्तम् । तादृशेन परमात्मना कृष्णेनाहं वञ्चितेति खिन्नेति भावः ॥ ९१ ॥

गुरोरन्तेवासी स भजति यदूनां सचिवतां
सखी कालिन्दीयं किल भवति कालस्य भगिनी ।
भवेदन्यः को वा नरपतिपुरे मत्परिचितो
दशामस्याः शंसन् यदुतिलक ! यस्त्वामनुनयेत् ॥ ९२ ॥
विशीर्णाङ्गीमन्तर्व्रणविलुठनादुत्कलिकया
परीतां भूयस्या सततमपरागव्यतिकराम् ।
परिध्वस्तामोदां विरमितसमस्तालिकुतुकां
विधो ! पादस्पर्शादपि सुखय राधाकुमुदिनीम् ॥ ९३ ॥
विपत्तिभ्यः प्राणान् कथमपि भवत्सङ्गमसुख-

गुरोरिति । हे यदुतिलक ! स गुरोरन्तेवासी बृहस्पतिशिष्यः उद्धवः यदूनां यादवानां सचिवतां मन्त्रितां भजति करोति, इयं सखी कालिन्दी यमुना कालस्य यमस्य भगिनी किल भवति, अतः अन्यः को वा नरपतिपुरे मधुपुरे मम परिचितः विदितः भवेत् ? यः अस्याः मत्सख्याः दशां शंसन् कीर्त्तयन् त्वाम् अनुनयेत् विनयेन बोधयेत्, न कोऽपीत्यर्थः ॥ ९२ ॥

विशीर्णाङ्गीमिति । हे विधो चन्द्र ! गोकुलस्येति शेषः, अन्तर्व्रणस्य सन्तापस्य अन्तर्गतकीटादिक्षतस्य च विलुठनात् विशेषेणा-विर्भावादिति भावः विशीर्णाङ्गीं विध्वस्तकलेवरां, सततं भूयस्या महत्या उत्कलिकया उत्कण्ठया तरङ्गेण च परीतां युक्ताम् आन्दोलिताञ्च, अपरागव्यतिकरां विरागपूर्णां वर्णप्रभारहिताञ्च, परिध्वस्तामोदां निरानन्दां सौरभशून्याञ्च, विरमितं निवर्त्तितं समस्तानाम् आलीनां सखीनां कुतुकम् आनन्दः यया तादृशीं, विरमितं समस्तम् अलीनां भ्रमराणां कुतुकं यया तथोक्ताञ्च, राधाकुमुदिनीं पादस्य चरणस्य किरणस्य च स्पर्शादपि सुखय सुखीकुरु ॥ ९३ ॥

विपत्तिभ्य इति । हे शौरे ! मम सहचरी भवतः सङ्गमे-यत्

स्पृहाधीना धीरे! मम सहचरी रक्षितवती।
अतिक्रान्ते सम्प्रत्यवधिदिवसे जीवनविधौ
हताशा निःशङ्कं वितरति दृशौ चूतमुकुले ॥ ९४ ॥
प्रतीकारारम्भश्लथमतिभिरुद्यत्परिणतै-
र्विमुक्ताया व्यक्तस्मरकदनभाजः परिजनैः।
अमुञ्चन्ती सङ्गं कुवलयदृशः केवलमसौ
बलादस्याः प्राणानवति भवदाशासहचरी ॥ ९५ ॥
अये रासक्रीडारसिक! मम सख्यां नवनवा
पुरा बद्धा येन प्रणयलहरी हन्त गहना।

इयं तस्मिन् या स्पृहा आशा तस्या अधीना सती विपत्तिभ्यः दुःखेभ्यः कथमपि प्राणान् रक्षितवती। सम्प्रति अवधिदिवसे अस्मिन् दिने मया आगन्तव्यमिति त्वया निर्णीते दिने अतिक्रान्ते गते सति जीवनविधौ प्राणनव्यापारे हताशा सती चूतमुकुले आम्राङ्कुरे निःशङ्कं यथा तथा दृशौ नयने वितरति निक्षिपति। चूतमुकुलस्योद्दीपकत्वात् तद्दर्शनेन शीघ्रं मदनानलदग्धा प्राणान् त्यजामीति धियेति भावः ॥ ९४ ॥

प्रतीकारेति। केवलम् असौ भवदाशासहचरी भवत्प्राप्ति-वासनारूपा सखी प्रतीकारस्य आरम्भे करणे श्लथाः याः मतयः ताभिः उद्यत् उदयं गच्छत् परिणतं परिपाकः येषां तैः कथमपि न प्रतिकर्तुं शक्नोति स्थिरमतिरिति यावत् परिजनैः अस्माभिरिति भावः। विमुक्तायाः त्यक्तायाः व्यक्तं स्फुटं स्मरस्य कामस्य यत् कदनं पीडनं तद्भाजः तद्युक्तायाः कुवलयदृशः नीलोत्पलाक्ष्याः राधायाः सङ्गम् अमुञ्चन्ती अत्यजन्ती अस्या इदानीं बलात् बलमाश्रित्य प्राणान् अवति रक्षति ॥ ९५ ॥

अये इति। अये रासक्रीडारसिक! येन त्वया पुरा पूर्वं

स चेन्मुक्तापेक्षस्त्वमसि धिगिमां तूलशकलं
यदेतस्या नासानिहितमिदमद्यापि चलति ॥ ९६ ॥
मुकुन्द ! भ्रान्ताक्षी किमपि यदसङ्कल्पितचरं
विधत्ते तद्वक्तुं जगति मनुजः कः प्रभवति ।
कदाचित् कल्याणी विलपति यदुत्कण्ठितमति-
स्तदाख्यामि स्वामिन् ! गमय मकरोत्तंससविधम् ॥ ९७
अभूत् कोऽपि प्रेमा मयि मुररिपोर्यः सखि ! पुरा
परादु धर्मापेक्षामपि तदवलम्बादलघयम् ।
तथेदानीं हा धिक् समजनि तटस्थः स्फुटमहं
भजे लज्जां येन क्षणमिह पुनर्जीवितुमपि ॥ ९८ ॥

मम सख्यां नवनवा महती सान्द्रा प्रणयलहरी प्रेमवीची बद्धा हन्त खेदे । स त्वं चेत् यदि मुक्तापेक्षः निरपेक्षः अपि तादृशप्रेमवर्जितो भवसीत्यर्थः तदा इमां मत्सखीं धिक्, यत् यतः एतस्याः सख्याः तूलशकलं तूलखण्डनिभमिति भावः इदं जीवनमिति शेषः नासानिहितं नासिकाग्रवर्त्तीति भावः तत् अद्यापि चलति नाद्यापि म्रियते इयमिति भावः ॥ ९६ ॥

मुकुन्देति । हे स्वामिन् मुकुन्द ! भ्रान्ताक्षी घूर्णितनयना मोहादिति भावः इयं यत् असङ्कल्पितचरं कदापि मनसा न चिन्तितमिति भावः यत् विधत्ते करोति, जगति कः मनुष्यः तत् वक्तुं प्रभवति समर्थो भवति ? न कोऽपीत्यर्थः । कल्याणी मङ्गलमयी इयं कदाचित् उत्कण्ठितमतिः सती यत् विलपति, तत् आख्यामि कथयामि, मकरोत्तंसस्य मकराङ्कतस्य कृष्णस्येति भावः सविधं समीपं गमय प्रापय तत् द्रष्टुमिति भावः ॥ ९७ ॥

अभूदिति । हे सखि ! पुरा मुररिपोः कृष्णस्य मयि यः कोऽपि प्रेमा अभूत्, परात् अत्यन्तात् तस्य प्रेम्णः अवलम्बात्

अमी कुञ्जाः पूर्वं मम न दधिरे कामपि मुदं
द्रुमालीयं चेतः सखि ! न कतमो नन्दितवती ।
इदानीं पश्यैते युगपदुपतापं विदधते
प्रभौ मुक्तापेक्षे भजति न हि को वा विमुखताम् ॥९९॥
गरीयान् मे प्रेमा त्वयि परमितिस्नेहलघुता
न जीविष्यामीति प्रणयगरिमाख्यापनविधिः ।
कथं नायासीति स्मरणपरिपाटीप्रकटनं
हरौ सन्देशाय प्रियसखि ! न मे वागवसरः ॥ १०० ॥

आश्रयणात् धर्मापेक्षामपि धर्मानुरोधमपि सतीत्वनाशादिति भावः अवश्यं संघटितवत्यस्मि। हा धिक्, इदानीं तथा तटस्थः निःसम्बन्ध इति भावः समजनि जातः स प्रेमेति शेषः, येन पुनः इह संसारे क्षणमपि जीवितुम् अहं स्फुटं स्पष्टं लज्जां भजे प्राप्नोमि ॥ ९८ ॥

अमी इति । हे सखि ! अमी कुञ्जाः पूर्वं मम कां मुदं नापि नैव दधिरे नैव जनयामासुः ? अपितु सर्वामेव मुदं दधिरे इत्यर्थः । इयं द्रुमाली वृक्षश्रेणी कतमः कतिवारान् न नन्दितवती ? अपितु सततमेव नन्दितवतीत्यर्थः । इदानीं पश्य एते कुञ्जादयः युगपत् समकालम् उपतापं सन्तापं विदधते । प्रभौ नाथे कृष्णे मुक्तापेक्षे निरपेक्षे सति को वा विमुखतां न हि भजति ? सर्व एव भजतीत्यर्थः ॥ ९९ ॥

गरीयानिति । मे मम त्वयि गरीयान् प्रेमा इति स्नेहस्य लघुता लाघवं परं केवलं न जीविष्यामि त्वया विनेति भावः इति उक्तिः प्रणयस्य गरिम्णः गुरुत्वस्य ख्यापनविधिः प्रकटनप्रकारः । कथं न आयासि न आगच्छसि इति स्मरणस्य परिपाटीप्रकटनं रीति-

ययौ कालः कल्याण्यवकलितकेलीपरिमलां
विलासार्थी यस्मिन्नचलकुहरे लीनवपुषीम्।
स मां धृत्वा धूर्त्तः कृतकपटरोषां सखि! हठाद्
अकार्षीदाकर्षन्नुरसि सखिलेखाशतवृताम्॥ १०१॥

कदा प्रेमोन्मीलन्मदनमदिराक्षीसमुदयं
बलादाकर्षन्तं मधुरमुरलीकाकलिकया।
मुहुर्भ्राम्यच्चिल्लीचुलुकितकुलस्त्रीव्रतमहं
विलोकिष्ये लीलामदमिलदपाङ्गी मुरभिदम्॥ १०२॥

प्रकाशः, हे प्रियसखि! अतः हरौ कृष्णे सन्देशाय वाचिकाय मे न वागवसरः वाक्यप्रसरः अस्तीति शेषः॥ १००॥

ययाविति। हे कल्याणि! सखि! कालः स इति शेषः ययौ गतः, यस्मिन् काले विलासार्थी विहर्त्तुकामः धूर्त्तः शठः मया अवगणितः निराकृत इति यावत् सः कृष्णः अवकलितः अगणितः केलीपरिमलः क्रीड़ासौरभं यया तथोक्ताम् अचलकुहरे पर्वतगुहायां लीनवपुषीं गूढ़कलेवरां कृतकपटरोषां प्रणयकुपिताभिति भावः सखिलेखानां सखीश्रेणीनां शतैः वृतां मां हठात् धृत्वा आकर्षन् उरसि वक्षसि अकार्षीत् चकार॥ १०१॥

कदेति। अहं मधुरा मनोहारिणी या मुरलीकाकलिका वंशीसूक्ष्मरवः तया प्रेम्णा उन्मीलन् विकसन् यः मदनः कामः तेन मदिरे मत्तखञ्जनाविव अक्षिणी नेत्रे यासां ताः तासां समुदयं समूहं बलात् आकर्षन्तं स्वसमीपमानयन्तं मुहुः पुनः पुनः भ्राम्यन्ती या चिल्ली दृग्भङ्गिविशेषः तया चुलुकितं गण्डूषीकृतं नाशितमित्यर्थः कुलस्त्रीणां व्रतं येन तथोक्तं मुरभिदं कृष्णं लीलया यो मदः तेन मिलन् सङ्गच्छन् अपाङ्गो यस्यास्तथाभूता सती कदा विलोकिष्ये द्रक्ष्यामि॥ १०२॥

रणद्भृङ्गश्रेणीसुहृदि शरदारम्भमधुरे
वनान्ते चान्द्रीभिः किरणलहरीभिर्धवलिते ।
कदा प्रेमोद्दण्डस्मरकलहवैतण्डिकमहं
करिष्ये गोविन्दं निविडभुजबन्धप्रणयिनम् ॥ १०३ ॥
मनो मे हा कष्टं ज्वलति किमहं हन्त करवै
न पारं नावारं किमपि कलयाम्यस्य जलधेः ।
इयं वन्दे मूर्ध्ना सपदि तमुपायं कथय मे
परामृश्ये यस्माद्धृतिकणिकयापि क्षणिकया ॥ १०४ ॥
प्रयातो मां हित्वा यदि विबुधचूडामणिरसौ
प्रयातु स्वच्छन्दं मम समयधर्मः किल गतिः ।

रणदिति । कदा अहं रणन्तीनां गुञ्जन्तीनां भृङ्गश्रेणीनां सुहृदि बान्धवे, शरदः आरम्भेण प्रवृत्त्या मधुरे मनोहरे, चान्द्रीभिः चन्द्रसम्बन्धिनीभिः किरणलहरीभिः मयूखतरङ्गैः धवलिते वनान्ते वनसीमायां, प्रेम्णा उद्दण्डः उद्भटः स्मरः कामो यत्र तादृशे कलहे वैतण्डिकं वितण्डावादिनं गोविन्दं, निविडेन भुजेन यः बन्धः तस्य प्रणयिनं करिष्ये ॥ १०२ ॥

मन इति । हा कष्टं, मे मम मनः ज्वलति, हन्त खेदे, अहं किं करवै, अस्य जलधेः विरहार्णवस्येति भावः पारं न अवारं न किमपि कलयामि नावधारयामि । इयमहं विपत्पारावारपतिताहं मूर्ध्ना शिरसा वन्दे प्रणमामि त्वामिति शेषः, तम् उपायं मे मह्यं कथय, यस्मात् उपायात् यमुपायमाश्रित्य त्वं क्षणिकयापि धृति-कणिकया विनोदलेशेन परामृश्ये स्पृश्ये अहमपि विनोदं लभे इति भावः ॥ १०४ ॥

प्रयात इति । यदि विबुधानां देवानां चूडामणिः असौ कृष्णः

इदं सोढुं का वा प्रभवति यतः स्वप्नकपटाद्
इहायातो वृन्दावनभुवि बलान्मां रमयति ॥ १०५ ॥
अनौचित्यं तस्य व्यथयति मनो हन्त मथुरां
समासाद्य स्वैरं चपलहृदयं धावय हरिम् ।
सखि ! स्वप्नारम्भे पुनरपि यथा विभ्रममदाद्
इहायातो धूर्त्तः चपयति न मे किङ्किणिगुणम् ॥१०६॥
अयि स्वप्नो दूरे निवसतु समक्षं शृणु हठाद्
अविश्वस्ता मा भूरिह सखि ! मनो विभ्रमधिया ।
वयस्यस्ते गोवर्द्धनविपिनमासाद्य कुतुकाद्
अकाण्डे यद्भूयः स्मरकलहपाण्डित्यमकरोत् ॥ १०७ ॥

मां हित्वा त्यक्त्वा प्रयातः गतः, स्वच्छन्दं यथा तु गच्छतु, समयधर्मः कालधर्मः मृत्युः मम गतिः किल उपाय एव । का वा इदं सोढुं प्रभवति, यतः स एव स्वप्नकपटात् निद्राव्याजेन इह वृन्दावने आयातः सन् बलात् मां रमयति ॥ १०५ ॥

अनौचित्यमिति । हन्त खेदे, तस्य अनौचित्यम् अयुक्ताचरणमित्यर्थः मनः व्यथयति । अतः हे सखि ! त्वं मथुराम् आसाद्य गत्वा स्वैरं स्वच्छन्दं चपलहृदयं हरिं कृष्णं धावय, यथा धूर्त्तोऽसौ स्वप्नारम्भे विभ्रममदात् कामावेशजनितादिति भावः इह वृन्दावने आयातः सन् मे मम किङ्किणिगुणं कटिवसनग्रन्थिमिति भावः न चपयति न भ्रंशयति ॥ १०६ ॥

अयीति । अयि सखि ! स्वप्नः दूरे निवसतु तिष्ठतु, समक्षं प्रत्यक्षं शृणु, मनसः विभ्रमः भ्रान्तिरयमिति धिया बुद्ध्या हठात् इह मदुक्ते विषये इत्यर्थः अविश्वस्ता अविश्वासिनी मा भूः न भव । ते तव वयस्यः सखा कृष्णः गोवर्द्धनविपिनम् आसाद्य अकाण्डे

अमर्षादावन्तीं गहनकुहरे सूचितपथां
तुलाकोटिक्वाणैः स्खलितपदपातद्विगुणितैः ।
दिधीर्षन्मां हर्षोत्तरलनयनान्तः स कुतुकी
न वंशीमग्रासीद्भुवि करसरोजाद्विगलिताम् ॥ १०८ ॥
अयत्नां गत्वाब्दे कलितनवचेलाञ्चलतया
लतालीभिः पुष्पस्मितशबलिताभिर्विहसतीम् ।
परीहासारम्भी प्रियसखि ! समालम्बितसुखीं
प्रपेदे चुम्बाय स्फुरदधरबिम्बस्तव सखा ॥ १०९ ॥
ततोऽहं पश्यन्ते स्थगितमुरलीका सखि ! शनै-

स्पृहया कुतुकात् यत् भूयः समधिकं पुनःपुनर्वा चारुकच्छपापितम् कामकलहवैदग्ध्यम् अकरोत् ॥ १०७ ॥

अमर्षादिति । हर्षेण आनन्देन उत्तरले चञ्चले नयनयोरन्तः यस्य तादृशः कुतुकी कौतुकवान् स हरिः गहनकुहरे काननाभ्यन्तरे अमर्षात् प्रणयेर्ष्याजनितादिति भावः आवन्तीं स्खलितेन निःशब्दसञ्चारेणेति भावः पदपातैः पादविक्षेपैः द्विगुणितैः तुलाकोटिक्वाणैः नूपुरनिनादैः सूचितपथां विदितमार्गां मां दिधीर्षन् धर्तुमिच्छन् करसरोजात् करकमलात् भुवि विगलितां वंशीं न अग्रासीत् ॥ १०८ ॥

अयत्नामिति । हे प्रियसखि ! तव सखा कृष्णः परीहासारम्भी परिहासविलासैः चुम्बाय चुम्बनाय स्फुरत् अधरबिम्बं यस्य तादृशः सन् पुष्पाण्येव स्मितानि तैः शबलिताभिः विचित्राभि-र्विलसद्भिः लतालीभिः लताश्रेणिभिः कलितम् आक्रान्तं नवं चेलाञ्चलं वसनप्रान्तः यस्याः तस्या तया गत्वाब्दे अयत्नात् यत्नं विहसन्तीं समालम्बितं समालब्धं मुखं यस्याः तथाभूतां मां प्रपेदे प्राप ॥ १०९ ॥

तत इति । हे सखि ! ततः अनन्तरम् अहं पश्यन्ते स्थग-

रक्षीकामर्षेण भ्रमदविरलभ्रूरुदचलम् ।
कचाकृष्टिक्रीडाक्रमपरिचिते चौर्यचरिते
हरिर्लक्ष्योपाधिः प्रसभमनयन्मां गिरिदरीम् ॥ ११० ॥
कदाचिद्वासन्तीकुहरभुवि धृष्टः सरभसं
हसन् पृष्ठालम्बी स्थगयति कराभ्यां मम दृशौ ।
दिधीर्षौ जातेर्ष्यं मयि सखि ! तदीयाङ्गुलिशिखां
न जाने क्वायं व्रजति कितवानां कुलगुरुः ॥ १११ ॥
अतीतेयं वार्त्ता विरमतु पुरः पश्य सरले !
वयस्यस्ते सोऽयं स्मितमधुरिमोन्मृष्टवदनः ।
भुजस्तम्भोल्लासादभिमतपरीरम्भरभसः
स्मरक्रीडासिन्धुः क्षिपति मयि बन्धूककुसुमम् ॥ ११२ ॥

केशे स्थगिता गोपिता मुरली यया तादृशी सती अलीका-
मर्षेण अवितथेर्ष्यया भ्रमन्ती घूर्णमाना अविरला घना भ्रूर्यस्याः
तथोक्ता शनैः मन्दं मन्दम् उदचलं प्रस्थिताऽस्मि । ततः कचानां
केशानाम् आकृष्टिराकर्षणं तया या क्रीड़ा तस्याः क्रमः नियमः
परिचितः विदितः यस्मिन् तादृशे चौर्यचरिते लक्ष्योपाधिः लक्ष्य-
प्रतिष्ठः नवनीतचौर्यस्य प्रसिद्धत्वादिति भावः हरिः प्रसभं बलात्
मां गिरिदरीं पर्वतगुहाम् अनयत् ॥ ११० ॥

कदाचिदिति । हे सखि ! कदाचित् कितवानां धूर्त्तानां कुल-
गुरुः धृष्टः चपलः अयं हरिः वासन्तीकुहरभुवि नवमल्लिकाभ्यन्तरदेशे
हसन् पृष्ठालम्बी पृष्ठदेशमागतः सन् कराभ्यां मम दृशौ नयने स्थग-
यति तिरोधत्ते । जातेर्ष्यं सेर्ष्यमित्यर्थः यथा तथा मयि तदीया-
ङ्गुलिशिखां तस्याङ्गुल्यग्रभागं दिधीर्षौ धर्त्तुमिच्छौ सत्यां क्व व्रजति
गच्छति, न जाने ॥ १११ ॥

अतीतेयमिति । हे सरले ! इयम् अतीता गता वार्त्ता विर-

समुत्तिष्ठ क्रीड़ावति! निविड़मुक्तालतिकया
बधानैनं धूर्त्तं सखि! मधुपुरीं याति न यथा।
इति प्रेमोन्मीलन्नवदनुभवारूढ़जड़िमा
सखीनामाक्रन्दं न किल कतिधः कन्दलयति ॥ ११३ ॥
अहो कष्टं बाल्यादहमिह सखीं दुष्टहृदया
मुहुर्मानग्रन्थिं सहजसरलां ग्राहितवती।
तदारम्भाद् गोपीगणरतिगुरो! निर्भरमसौ
न लेभे कुत्रापि त्वदमलभुजस्तम्भरभसम् ॥ ११४ ॥

सतु निभृत, पुरः अग्रतः पश्य, स्मरक्रीड़ाविस्रः कामक्रीड़ारससागरः सोऽयं ते नव वयस्यः स्मितस्य मधुरिमणा माधुर्य्येण उन्मृष्टम् उत्फुल्लं वदनं यस्य तथाभूतः अभिमते इष्टे परीरम्भे आलिङ्गने रभसो वेगो हर्षो वा यस्य तादृशः सन् भुजौ स्तम्भाविव मन्दत्वादिति भावः तयोः उल्लासात् मां प्रति प्रक्षेपजनिष्यमाणानन्दात् हेतोः मयि बन्धुकुसुमं क्षिपति इत्याकूतार्थमिति भावः ॥ ११२ ॥

तदिति । हे क्रीड़ावति! सखि! तत् तस्मात् उत्तिष्ठ, निविड़या सान्द्रया मुक्तालतिकया मौक्तिकहारेण एनं धूर्त्तं बधान, यथा मधुपुरीं न याति न गन्तुं शक्नोतीत्यर्थः। इतीत्थं प्रेम्णा उन्मीलन् उद्भवन् नवः अभिनवः अनुभवः श्रमजनितं स्वेदोद्गममाचरणमिति भावः तेन आरूढ़ः जातः जड़िमा जाड्यं मोहः इति यावत् यस्याः तथाभूता सती कतिधः कतिवारं सखीनाम् अश्रुाकर्षिणी भावः आक्रन्दं न किल कन्दलयति नैव वर्द्धयति? अपितु सततमेव कन्दलयतीत्यर्थः ॥ ११३ ॥

अहो इति । अहो कष्टं हा कष्टं, दुष्टहृदया अहं बाल्यात् शैशवात् शैशवमारभ्येत्यर्थः आरभ्यार्थे पञ्चमी । इह वृन्दावने सहजसरलां स्वभावऋजुं सखीं हठः पुनःपुनः मानग्रन्थिं ग्राहित-

अलिन्दे कालिन्दीकमलसुरभौ कुञ्जवसते-
र्वसन्तीं वासन्तीनवपरिमलोद्गारचिकुराम्।
त्वदुत्सङ्गे लीनां मदमुकुलिताक्षीं पुनरिमां
कदाहं सेविष्ये किसलयकलापव्यजनिनी ॥ ११५ ॥
धृतानन्दां वृन्दावनपरिसरे शारदनिशा-
विलासोल्लासेन श्लथितकबरीभ्रष्टकुसुमाम्।
तव स्कन्धोपान्ते विनिहितभुजां गोपरमणीं
कदा कुञ्जे लीना रहसि विहसिष्यामि सुमुखीम् ॥ ११६

सखी रचितसखी। हे गोपीमदनरतिगुरो ! उदारत्वात् तस्य मान-पर्य्यारात्वात् आवरत्वात् असौ मत्सखी कुत्रापि कासयापि तव अवशेन चारुणा भुजेन यः सख्यः बन्धनम् आलिङ्गनमिति यावत् तेन रभसम् आनन्दं निर्भरं यथा स्यात् तथा — लेभे न प्राप ॥ ११४ ॥

अलिन्दे इति। कदा अहं किसलयकलापव्यजनिनी नव-पल्लवनिचयेन वीजयन्ती सती कालिन्दीकमलसुरभौ यमुनासरोज-सुगन्धे कुञ्जवसतेः निकुञ्जमन्दिरस्य अलिन्दे बहिर्भूमौ वसन्तीं वासन्तीनां माधवीलताकुसुमानां नवं परिमलं सौरभम् उद्गिरन्तीति तथोक्ताः चिकुराः केशाः यस्याः तथोक्तां माधवीलताकुसुमखचितकेशामिति भावः तव त्वदुत्सङ्गे क्रोडे लीनां स्थितां मदेन मद्यपानेन सौभाग्य-गर्वेण वा मुकुलिते सङ्कुचिते अक्षिणी यस्याः तथाभूताम् इमां मत्सखीं पुनः सेविष्ये परिचरिष्यामि ॥ ११५ ॥

धृतानन्दामिति। कदाहं कुञ्जे लीना निभृतस्थिता सती वृन्दा-वनपरिसरे शारदी शरत्कालीना या निशा तस्यां यो विलासः रतिक्रीडा तस्य उल्लासेन धृतः जनितः आनन्दो यस्याः तां, श्लथि-तायाः कबर्य्याः केशपाशात् भ्रष्टानि विच्युतानि कुसुमानि यस्याः तथोक्तां, तव स्कन्धोपान्ते स्कन्धस्य प्रान्तदेशे विनिहितौ विशेषेण

विदूरादाहर्त्तुं कुसुममुपयामि त्वमधुना
पुरस्तीरे तीरे कलय तुलसीपल्लवमिदम् ।
इति व्याजादेनां विदितभवदीयस्थितिरहं
कदा कुञ्जे गोपीरमण ! गमयिष्यामि समये ॥ ११७ ॥

इति श्रीकंसारेः पदकमलयोर्गोकुलकथां
निवेद्य प्रत्येकं भज परिजनेषु प्रणयिताम् ।
नितान्ते कादम्बीमधुकर ! वहन् मञ्जुनतया
स यात्युच्चैः प्रेमप्रणयमनुजग्राह भगवान् ॥ ११८ ॥

मिलद्भृङ्गीं हंसीरमण ! वनमालां प्रथमतो
ऽर्पितो भुजौ यया तादृशीं सुमुखीं तवाम्नीं गोपरमणीं
रहसि वनान्ते विहारयिष्यामि ? ॥ ११६ ॥

विदूरादिति । हे गोपीरमण ! कदाहं कुञ्जे विदित्वा भवदीया स्थितिर्यया तथोक्ता कुञ्जे स्थितं भवन्तं जानतीत्यर्थः विदूरात् कुसुमम् आहर्त्तुम् उपयामि गच्छामि, त्वम् अधुना पुरः अग्रतः तीरे तीरे इदं तुलसीपल्लवं तुलसीपत्रं कलय संचिनु, इतीत्थं व्याजात् छलात् एनां मत्सखीं समये सङ्केतभूमाविति भावः गमयिष्यामि प्रेषयिष्यामि ? ॥ ११७ ॥

इतीति । हे कादम्बीमधुकर ! मरालीवल्लभ ! नितान्ते मञ्जुनतया भूषणतया वहन् कादम्बीमिति शेषः सन् इतीत्थं श्रीकंसारेः कृष्णस्य पदकमलयोः पादपद्मयोः गोकुलकथां निवेद्य प्रत्येकं परिजनेषु तदीयेष्विति भावः प्रणयितां भज गच्छ । कथमित्याह स इति, भगवान् कृष्णः यं प्रेमप्रणयं प्रणयपरायणम् अनुजग्राह, स उच्चैः याति उन्नतिं प्राप्नोति । एतद्दौत्यकरणे तव भाविनी उन्नतिरिति भावः ॥ ११८ ॥

मिलद्भृङ्गीमिति । हे हंसीरमण ! प्रथमतः आदौ मिलन्तः

मुदा क्षेमं पृच्छन्निदमुपहरेथा मम वचः ।
चिरं कंसारातेरुरसि सहवासप्रणयिनीं
किमेनामेणाक्षीं गुणवति ! विसस्मार भवती ॥ ११९ ॥
इदं किं वा हन्त स्मरसि रसिके ! खण्डनरुषा
परीताङ्गी गोवर्द्धनगिरिनितम्बे मम सखी ।
भिया सम्भ्रान्ताक्षं यदिह विचकर्ष त्वयि बलाद्
गृहीत्वा विभ्रश्यन्नवशिखिशिखं गोकुलपतिम् ॥१२०॥
ततः सम्भाषेथाः श्रुतिमकरमुद्रामिति मुदा
भवत्यां कर्त्तव्यः किमिति कुशलप्रश्नजाड्मा ।

मञ्जुच्छन्नः भृङ्गाः यस्यां तादृशीं वनमालां कृष्णकण्ठवर्त्तिनीमिति भावः मुदा आनन्देन क्षेमं कुशलं पृच्छन् सन् इदं मम वचः उपहरेथाः ब्रूहि । किमित्याह चिरमिति, हे गुणवति ! भवती कंसारातेः कृष्णस्य चिरम् उरसि वसामि सहवासेन यथा त्वं वससि तथा इयमपि वसतीति भावः प्रणयिनीम् एनाम् एणाक्षीं मृगनयनां राधां किं कथं विसस्मार विस्मृतवती असि ॥ ११९ ॥

इदमिति । हे रसिके ! मम सखी खण्डनरुषा अन्यासङ्ग-जनितेर्ष्याकोपेन, प्रातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायितेति सम्पुटः । परीताङ्गी युक्तदेहा सती इह गोवर्द्धनगिरेः नितम्बे मेखलायां भिया भयेन सम्भ्रान्ताक्षं चकितनेत्रं विभ्रश्यन्ती नवा शिखिनः मयूरस्य शिखा यस्मात् तथोक्तं गोकुलपतिं गृहीत्वा बलात् त्वयि यत् विचकर्ष आकृष्टवती, इदं किं वा स्मरसि ? हन्त खेदे ॥ १२० ॥

तत इति । ततः वनमालाप्रश्नानन्तरं मुदा हर्षेण श्रुतिमकर-मुद्रां कर्णस्थितमकरभूषणाम् इति सम्भाषेथाः आलपेः । भवत्यां त्वयि कुशलप्रश्नजाड्मा मङ्गलप्रश्नेन जाड्यं मूर्खत्वमित्यर्थः किमिति -कथं

रुचिस्मेरा या त्वं रचयसि बलाच्चुम्बनकलाम्
अपाङ्गेन स्पृष्टा सखि ! मुररिपोर्गण्डकुहरे ॥ १२१ ॥
निवासस्ते देवि ! श्रवणलतिकायामिति धिया
प्रयत्नात्त्वामेव प्रणयहृदया यामि शरणम् ।
परोक्षं वृष्णीनां निभृतनिभृतं कर्णकुहरे
हरेः काकुन्मिश्रां कथय सखि राधाविधुरताम् ॥१२२॥
परीरम्भं प्रेम्णा मम सविनयं कौस्तुभमणौ
ब्रुवाणः कुर्वीथाः पतगवर ! विज्ञापनमिदम् ।
अगाधा राधायामपि तव सखे ! विस्मृतिरभूत्
कथं वा कल्याणं वहति तरले हि प्रणयिता ॥ १२३ ॥

कर्त्तव्यः कुशलदर्शनेऽपि कुशलप्रश्नः मर्त्त्यविलसितमिति भावः । किं तत् कुशलमित्याह रुचिस्मेरेति, हे सखि ! रुच्या कान्त्या स्मेरा हसन्तीवेति भावः या त्वम् अपाङ्गेन स्पृष्टा सती मुररिपोः कृष्णस्य गण्डकुहरे कपोलाभ्यन्तरे बलात् हठात् चुम्बनकलां चुम्बनशिल्पं रचयसि करोषि, इतः परं कुशलं किमिति कुशलप्रश्नो जाड्यमिति भावः ॥ १२१ ॥

निवास इति । हे सखि ! देवि ! श्रवणलतिकायां श्रोत्रलतायां हरेरिति शेषः ते तव निवासः स्थितिः, इति धिया बुद्ध्या प्रणयः हृदये यस्याः तथाभूता सप्रणयमिति भावः अहं प्रयत्नात् त्वामेव न त्वन्यमित्यन्यव्यवच्छेदक एवशब्दः । शरणं यामि गच्छामि । त्वं वृष्णीनां यादवानां परोक्षम् असाक्षात् निभृतनिभृतम् अतिनिभृतं यथा तथा हरेः कृष्णस्य कर्णकुहरे काकुन्मिश्रां विनयपूर्णामित्यर्थः राधायाः विधुरतां कातरतां कथय ॥ १२२ ॥

परीरम्भमिति । हे पतगवर ! पक्षिश्रेष्ठ ! कौस्तुभमणौ हरिवक्षःस्थलस्थिते इति शेषः प्रेम्णा मम परीरम्भम् आलिङ्गनं

मुहुः कूजत्काञ्चीमणिवलयमञ्जीरमुरली-
रवालम्बी भ्राम्यद्युवतिकलगीतैः सुरमणे ! ।
स किं साक्षाद्भावी पुनरपि हरेस्ताण्डवरसै-
रमन्दः कालिन्दीपुलिनभुवि तौर्य्यत्रिकभरः ॥ १२४ ॥
नवीनस्त्वं कम्बो ! पशुपरमणीभिः परिचयं
न धत्से राधाया गुणगरिमगन्धोऽपि न श्रुतौ ।
तथापि त्वां याचे हृदयनिहितं दोहदमहं
वहन्ते हि क्षान्ते प्रणयमवदातप्रकृतयः ॥ १२५ ॥

अवाप्यः सन् सविनयम् इदं विज्ञापनं कुर्व्वीथाः । हे वत्से ! राधायामपि तव अगाधा निरतिशया विस्मृतिः अभूत् । हि तथापि कल्याणं मङ्गलं वर्त्तति गच्छति अभ्युदयशालिनीति भावः तरले चपले जने कथं वा प्रणयिता सख्यं तिष्ठतीति शेषः नैव तिष्ठतीत्यर्थः, कौस्तुभस्य च वक्षसि आन्दोलितत्वेन चापल्यमिति भावः । अर्थान्तरन्यासः ॥ १२३ ॥

मुहुरिति । हे सुरमणे ! देवमणे ! कौस्तुभ ! मुहुः पुनः पुनः कूजन्तीनां काञ्चीनां रसनानां मणिवलयानां मञ्जीराणां नूपुराणां मुरल्याः वेणोश्च रवम् आलम्बते आश्रयतीति तथोक्तः तत्तद्रवमिश्र इत्यर्थः भ्राम्यन्तीनाम् इतस्ततः सञ्चरन्तीनां युवतीनां कलं मधुरं गीतं येषु तादृशैः ताण्डवरसैः नृत्यविलासैः अमन्दः महान् कालिन्दीपुलिनभुवि यमुनाकूलदेशे स तौर्य्यत्रिकभरः नृत्यगीतवाद्यमय उत्सवातिशयः किं पुनरपि हरेः कृष्णस्य साक्षात् समक्षं भावी भविष्यति ? तव दिव्यत्वादेतद्भाविविषयज्ञानं युज्यते इति त्वां प्रति प्रश्नावसर इति भावः ॥ १२४ ॥

नवीन इति । हे कम्बो ! शङ्ख ! शङ्खः स्यात् कम्बुरस्त्रियामित्यमरः । त्वं नवीनः साम्प्रतं उत्पन्नत्वादिति भावः । पशुपरमणीभिः

गृहीत्वा गोविन्दं जलधिहृदयानन्दन ! सखे !
सुखेन श्रीवृन्दावनपरिसरे नन्दतु भवान् ।
कथं वा ते गोष्ठं भवतु दयितं हन्त बलवान्
यदेतस्मिन् वेणोर्जयति चिरसौभाग्यमहिमा ॥ १२६ ॥
इति प्रेमोद्गारप्रभवमनुनीय क्रमवशात्
परीवारान् भ्रातर्निगमयति चानूरमथने ।
पुनः कोपोद्भिन्नप्रणयचटुलं तस्य निकटे
कथामाचक्षीथा दशभिरवतारैर्विलसिताम् ॥ १२७ ॥

गोपाङ्गनाभिः परिचयं न धत्से न भावयसि । तथा राधायाः गुणानां यो गरिमा गौरवं तस्य गन्धोऽपि न कृतीनामिषु इत्यर्थः । तथापि निःसम्बन्धेऽपीत्यर्थः अहं त्वां हृदयनिहितं मनोगतं दोहदम् अभिलाषं याचे प्रार्थये । हि यतः अवदाता विशुद्धा प्रकृतिर्येषां तादृशाः जनाः क्वान्ते विपक्षे जने प्रणयं दयामिति भावः वहन्ते कुर्वन्तीति यावत् । शुक्लत्वं च स्वच्छत्वात् अवदातप्रकृतित्वमिति बोध्यम् । अर्थान्तरन्यासः ॥ १२५ ॥

गृहीत्वेति । हे जलधिहृदयानन्दन ! जलधिजातत्वादिति भावः, हे सखे ! भवान् गोविन्दं गृहीत्वा सुखेन श्रीवृन्दावनपरिसरे नन्दतु आनन्दमनुभवतु । यदि वदसि गोष्ठं मे प्रियं किं यत् तत्राह गच्छामीत्याशङ्क्याह कथमिति, गोष्ठं कथं वा ते तव दयितं भवतु ? हर्षे खेदे वा अपितु प्रियमेव भवितेति भावः । यत् यतः एतस्मिन् गोष्ठे बलवान् वेणोः चिरसौभाग्यस्य गरिमा गौरवं जयति सर्वोत्कर्षेण वर्त्तते, तस्मात् शङ्खत्वगौरवभ्रंशो तव गतत्वमसंघटं स्थानं नास्तीति प्रतीतिर्भविष्यतीति धिया तवैतत् अतीव प्रियं भविष्यतीति भावः ॥ १२६ ॥

इतीति । हे भ्रातः ! इतीत्थं प्रेमृणः प्रणयस्य उद्गारः प्रकटनं प्रभवः हेतुर्यस्मिन् तद् यथा तथा चानूरमथने कृष्णे निगमयति

ग्रहीतुं त्वां प्रेमामिषपरिवृतं चित्तवडिशं
महामीनं क्षिप्रं न्यधित रसपूरे मम सखी ।
विवेकाख्यं छित्वा गुणमथ तदग्रासि भवता
हताशेयं किं वा शिव शिव ! विधातुं प्रभवति ॥१२८॥
वराकीयं दृष्ट्वा सुभग ! वपुषो विभ्रमभरं
तवाभ्यर्णं भेजे परमकुतुकोल्लासितमतिः ।
तिरोधाय स्वाङ्गं प्रकटयसि यत्त्वं कठिनतां
तदेतत् किं न स्यात् तव कमठमूर्त्तेः समुचितम् ॥१२९॥

स्फुरन्तीति वति क्रमवशात् क्रमेण परोपकारात् परिजनात् लब्धस्येति भावः अनुनीय तोषयित्वा पुनस्तस्य चानूरमथनस्य निकटे कोपेन उद्भिन्नः प्रकटितः यः प्रणयः तेन चटुलं चटुं यथा तथा दशभि-रवतारैः मीनकूर्मादिभिः विलसितां विजृम्भितां कथाम् आचक्षीथाः कथय ॥ १२७ ॥

ग्रहीतुमिति । मम सखी महामीनं त्वां ग्रहीतुं धर्तुं रसपूरे रागप्रवाहे प्रेम एव आमिषं मांसादिरूपं तेन परिवृतम् आवृतं चित्तवडिशं मनोरूपं वडिशं क्षिप्रं सत्वरं न्यधित निहितवती निक्षि-प्तवतीत्यर्थः । अथ अनन्तरं वडिशक्षेपणात् परमित्यर्थः भवता विवेकाख्यं गुणं सूत्रं छित्वा तत् वडिशम् अग्रासि कवलितम् । शिव शिवेति खेदे, हताशा इयं मम सखी किं वा अतःपरमिति भावः विधातुं कर्त्तुं प्रभवति शक्नोति ? न किमपीत्यर्थः ॥ १२८ ॥

वराकीति । हे सुभग ! इयं वराकी तपस्विनी अनुकम्पार्हेति भावः वपुषः शरीरस्य विभ्रमभरं विलासातिशयं दृष्ट्वा परमेण महता कुतुकेन उल्लासिता मतिः यस्याः तथाभूता सती तव अभ्यर्णं सान्निध्यं भेजे सिषेवे । किन्तु त्वं स्वाङ्गं स्वं शरीरं तिरोधाय गोपायित्वा यत् कठिनतां प्रकटयसि, तत् कमठमूर्त्तेः तव समुचितं सम्यक् उचितं किं न स्यात् अपितु स्यादेवेत्यर्थः ॥ २९ ॥

सदा कंसाराते ! स्फुरति चिरमद्यापि भवतः
स्फुटं क्रोडाकारे वपुषि निविडप्रेमलहरी ।
यतः सा सैरिन्ध्री मलयरुहपङ्कप्रणयिनी
त्वया क्रोडीचक्रे परमरभसादात्मदयिता ॥ १२० ॥
चिरादन्तर्भूता नरहरिमयी मूर्त्तिरभित-
स्तदीयो व्यापारस्तव किं न ययौ विस्मृतिपथम् ।
विनीतप्रह्लादस्त्वमिह परमक्रूरचरित-
प्रयुक्तो यद्भूयः परहृदयभेदं जनयसि ॥ १२१ ॥
यदात्मानं दर्पादगणितगुरुर्वामन ! मुदा-

सदेति । हे कंसाराते ! अद्यापि भवतः क्रोडाकारे वराहरूपे वपुषि निविडा घना प्रेमलहरी सदा सततं चिरं व्याप्य स्फुटं सुव्यक्तं यथा तथा स्फुरति राजते, यतः त्वया मलयरुहपङ्कप्रणयिनी चन्दनानुरागिणी सा सैरिन्ध्री नारी पृथिवीत्यर्थः । परमरभसात् परमहर्षात् आत्मनः आत्म दयिता प्रणयिनी कृत्वेति भावः क्रोडीचक्रे क्रोडे कृता ॥१२०॥

चिरादिति । नरहरिमयी नृसिंहरूपा मूर्त्तिः चिरात् अन्तर्भूता मनसि लग्ना तवेति शेषः, किं यतः तदीयः नरहरिसम्बन्धीत्यर्थः व्यापारः क्रिया तव विस्मृतिपथं न ययौ । यत् यतः विनीतः सान्त्वितः प्रह्लादः येन तथोक्तः पक्षे विनीतः अपनीतः प्रह्लादः प्रकृष्टानन्दः अस्माकमिति भावः येन तादृशः त्वम् इह संसारे परम् अत्यर्थम् अक्रूरम् अनिष्ठुरं यत् चरितं सदयचरितमित्यर्थः तेन प्रयुक्तः व्यापारितः सदय इति यावत् प्रह्लादं प्रनीति भावः । पक्षे परमेण क्रूरेण निष्ठुरेण चरितेन अथवा परं केवलम् अक्रूरस्य चरितेन दुराचरणेन प्रयुक्तः सन् भूयः पुनः पूर्वमसुरराजभेदस्य कृतत्वादिति भावः परेषां मादृशानामिति भावः हृदयभेदं हृद्विदारणं जनयसि करोषीत्यर्थः ॥ १२१ ॥

यदिति । हे वामन ! प्रियसखी वञ्चितया सौन्दर्यातिशय-

मनोवाच्यं नाट्यं त्वयि वलितया कल्पितवती ।
प्रपेदे तस्येदं फलमुचितमेव प्रियसखी
विदूरे यत् खिन्ना व्यसनकुलपाशैर्निगडिता ॥ १२२ ॥
इयं नाथ ! क्रूरा भृगुपतनमाकांक्षति ततो
यदस्याः काठिन्यं तव समुचितं तद् भृगुपतेः ।
इयं ते दुर्बोधाकृतिरथ भवद्विस्मृतिपदं
यतो यातः साक्षाद् गुरुरपि स मन्दीश्वरपतिः ॥१२३॥

रूपबलशालित्वेन पक्षे वलिविरोचनसुतोऽसुरराजः तस्य वा अज्ञानवशालित्वेन वा हेतुना दर्पात् अहङ्कारात् अनर्चिताः गुरवः वृद्धाः यया तथाभूता पक्षे अनर्चितः गुरुः असुराचार्यः शुक्रः येन तथोक्तः । पुरा शुक्रेणोक्तम्, असुरराज ! अयं कपटवामनाय त्रिपदां भूमिं प्रार्थितां मा प्रयच्छेति, बलिस्तु तदनादृत्य वामनाय त्रिलोकीं दत्त्वा हृतसर्वस्वः पातालमगमदिति पुराणम् । तदा आनन्देन आत्मानं मन एव वाच्यं यस्य तादृशे त्वयि यत् नाट्यं कल्पितवती, तस्य इदम् उचितमेव फलं प्रपेदे प्राप । यत् यस्मात् व्यसनकुलपाशैः विपत्समूहरूपैः पाशैः रज्जुभिः निगडिता संयता विदूरे खिन्ना पातिता त्वयेति शेषः ॥ १२२ ॥

इयमिति । हे नाथ ! इयं क्रूरा निष्ठुरा सदेहं प्रतीति भावः भृगुपतनं भृगोः पर्वतपतनस्थानात्, प्रपातस्त्वतटो भृगुरित्यमरः पतनम् आकाङ्क्षति इच्छति, ततः कारणात् अस्याः यत् काठिन्यं नैष्ठुर्यं त्वत्प्राप्तिजनितमिति भावः तत् भृगुपतेः परशुरामस्य तव समुचितम् । इयं ते तव आकृतिः दुर्बोधा अथ शब्दोऽनन्तरार्थः, अथेति पादपूरणार्थमव्ययम् । यतः आकृतेः सः गुरुरपि महानपि नन्दीश्वरपतिः शङ्करः साक्षात् स्वयं भवतः परमात्मरूपस्येति भावः विस्मृतिपदं विस्मरणं यातः प्राप्तः । शोचनेयं भवता दृष्टा पुरः

निरानन्दा गावश्चिरमुपहता दूषणकुलैः
खरायन्ते सद्यो रघुतिलक ! गोवर्द्धनतटाः ।
विराधत्वं घोषो व्रजति भवदीयप्रवसनात्
इदानीं मारीचः स्फुटमिह नरीनर्त्ति परितः ॥ १२४ ॥
प्रपन्नः कालोऽयं पुनरुदयितुं रासभजनै-
र्विलासिंस्तथापि स्फुटमनपराधा वयमपि ।
वितन्वानः कान्तिं वपुषि शरदाकाशवनितां
कथं न त्वं सीरध्वज ! भवसि वृन्दावनमिदम् ॥१२५॥

परमात्माखर्मिति न वेति विचारणात् संशयमनापेत समुदायार्थः ॥ १२३ ॥

निरानन्दा इति । हे रघुकुलतिलक राम ! गावः धेनवः पक्षे पृथिवीप्रदेशाः दूषणकुलैः दोषसमूहैः आपदृन्दैरिति भावः पक्षे तदाख्यराक्षसवृन्दैः, चिरं दीर्घकालम् उपहताः कष्टं गमिताः पक्षे उपद्रुताः । गोवर्द्धनतटाः गोवर्द्धनगिरिप्रदेशाः खरायन्ते तीक्ष्णा इव आचरन्ति पक्षे खराख्यराक्षसवत् आचरन्ति । भवदीयप्रवसनात् तव प्रस्थानात् घोषः गोकुलं विराधत्वं राधाशून्यत्वं पक्षे तदाख्यराक्षसत्वं व्रजति गच्छति । इदानीम् इह वृन्दावने परितः समन्तात् मारीचः मरीचयः पक्षे तदाख्यराक्षसः, मारीचः मारीभयमिति वार्थः, दैत्यानामुपद्रवादिति भावः । मारीशब्दात् चर-धातोः क्विप्प्रत्यये कृते मारीचर् प्रकृतेः क्लीवत्वे प्रथमैकवचनम् । स्फुटं नरीनर्त्ति पुनःपुनः नृत्यति प्रवर्त्ततीत्यर्थः ॥ १२४ ॥

प्रपन्न इति । हे विलासिन् सीरध्वज बलदेव ! पुनः रास-भजनैः रासवैभवैः रासक्रीडनैरिति यावत् उदयितुम् उपस्थातुम् अयं कालः प्रपन्नः आगतः रासक्रीडासमयोऽयमुपस्थित । इति भावः तथापि इदानीं वयमपि स्फुटम् अनपराधाः अकृतापराधाः अस्मन्य-

न रागं सर्वज्ञ ! क्वचिदपि विधत्ते नरपतिं
मुहुर्द्वेष्टि द्रोहं कलयति बलादिष्टविधये ।
चिरं ध्यानासक्ता निवसति सदासौ गतरति-
स्तथाप्यस्यां हंहो सदयहृदयस्त्वं न दयसे ॥ १२६ ॥

परिक्लेशम्लेच्छान् समदमधुपालीमधुरया
निकृन्तन् नैकान्तप्रणयरचनाखड्गलतया ।
त्वमासन्नः कल्किन्निह च तुरगोपाहितरुचिः
स्वदेशं कुर्वीथाः परिमुदितधीराधिकमिदम् ॥ १२७ ॥

राधा च, अतः शरदः शरत्कालस्य [illegible] आकाश[illegible] स्वच्छामिति भावः कान्तिं वपुषि शरीरे वितन्वानः विस्तारयन् त्वम् इदं वृन्दावनं किं कथं न भजसि नाश्रयसि ? ॥ १२५ ॥

नेति । हे सर्वज्ञ बुद्ध ! असौ मत्सखी क्वचिदपि विषये रागम् अनुरागम् आसक्तिमिति यावत् न विधत्ते न करोति, नरपतिं राजानं मुहुः पुनःपुनः द्वेष्टि नाभिलषतीति भावः, इष्टविधये इष्ट-साधनाय बलात् द्रोहम् अनिष्टकारकताचरणमिति यावत् कलयति करोति त्वत्तोऽन्यस्य इच्छाभावादिति भावः, गतरतिः सन्तोषर-हिता चिरं ध्यानासक्ता निवसति, तथापि सदयहृदयः त्वम् असौ मत्सख्यां न दयसे नानुकम्पसे इदमाश्चर्यम् । बुद्धोऽपि क्वचि-दपि विषये रागम् आसक्तिमिति यावत् न विधत्ते न करोति, सर्वत्र समदर्शित्वादिति भावः, नरपतिं मुहुः द्वेष्टि निन्दति हिंसादिरतत्वा-दिति भावः, इष्टविधये बलात् द्रोहं कलयति करोति तस्य इष्टानि-ष्टोभयराहित्यादिति भावः, सदा गतरतिः सन् चिरं ध्यानासक्तः तिष्ठतीति द्रष्टव्यम् ॥ १२६ ॥

परिक्लेशम्लेच्छानिति । हे कल्किन् ! इह वृन्दावने संसारे च समदा मदमत्ता या मधुपाली भ्रमरपङ्क्तिः तद्वत् मधुरा मनोहरा तया

इति प्रेमोद्गाढ़स्खपुटितवचोभङ्गिरखिलं
त्वमावेद्य क्लिद्यन्मुखपरिसरो लोचनजलैः ।
ततो गोविन्दस्य प्रतिचरणमाध्वीकपदवीम्
उपासीनो दृग्भ्यां क्षणमवदधीथाः खगपते ! ॥१२८॥

नेत्रान्तेषु नेत्रप्रान्तेषु या प्रणयरचना प्रेमस्फुरणं सा खड्गलता इव तया नेत्रविलासैः प्रेमरूपासिना अस्माकं परिक्लेशाः वन्नाभा एव म्लेच्छाः तान् निकृन्तन् नाशयन् पक्षे परितः क्लेशदायिनो ये म्लेच्छाः तान् नेत्रान्तप्रणयरचना इव चञ्चला या खड्गलता असिलता तया खण्डयन् निकृन्तन् तथा चतुरेषु गोपेषु उपार्जिता निर्मिता रुचिरनुरागो येन तथोक्तः पक्षे च इति पृथक्पदं, तुरगेण अश्वेन देवदत्तेनेति भावः उपार्जिता जनिता आरोहणेनेति भावः रुचिः कान्तिर्यस्य तथोक्तः अश्वारूढः सन्नित्यर्थः, त्वम् आगमः उपस्थितः अवतीर्णश्च इमं स्वदेशं गोकुलम् आर्य्यदेशञ्च परिहृदिता प्रहृष्टा धीर्यस्याः तथाभूता राधिका यत्र तादृशं पक्षे परिहृदिताः प्रहृष्टाः धीराः साधवः आधिकाः यत्र तादृशं कुर्वीथाः कुरु म्लेच्छ-लक्षणञ्च । गोमांसभक्षको यस्तु विरुद्धं बहुभाषते । सर्वाचा-रविहीनश्च म्लेच्छ इत्यभिधीयते ॥ १२७ ॥

इतीति । हे खगपते ! पक्षिराज हंस ! त्वम् इतीत्थं प्रेम्णा प्रणयेन उद्गाढा पूर्णा स्खपुटिता समविषमभावापन्ना वचसां भङ्गिः यस्य तथाभूतः, यत्र स्फुटतया प्रस्तोतव्यं तत्र तथैव, यत्र गूढत्वेन प्रस्तोतव्यं तत्र तथैव प्रेमपूर्णवाग्भङ्गिमानिति भावः, अखिलं समस्तं लोचनजलैः नयनवारिभिः क्लिद्यन् आर्द्रीभवन् मुखस्य परिसरः आयतनं यस्य तथाभूतः सन् आवेद्य निवेद्य ततः अनन्तरं निवेदनात् परमित्यर्थः गोविन्दस्य कृष्णस्य चरणयोः माध्वीकपदवीं मधुमयीं पद्धतिं प्रति दृग्भ्यां नयनाभ्याम् उपासीनः चरणयोरर्पितनेत्र इति भावः क्षणम् अल्पकालम् अवदधीथाः सावधानं तिष्ठेरित्यर्थः प्रति-वचन प्राप्त्याशयेति भावः ॥ १२८ ॥

प्रयातव्यो दृष्टेरनुभवपथं नन्दतनयो
विधेया गोपीनां स्मरपरिचितानामुपकृतिः ।
इयं यामैर्गम्या चतुर ! मथुरापि त्रिचतुरै-
रिति द्वैधं मा गाः कलय कलहंसीकुलपते ! ॥ १३९ ॥
अपूर्वा यस्यान्तर्विलसति मुदा सारसरुचि-
र्विवेक्तुं शक्येते सपदि मिलिते येन पयसी ।
कथङ्कारं युक्तो भवतु भवतस्तस्य कृतिनो
विलम्बः कादम्बीरमण ! मथुरासङ्गमविधौ ॥ १४० ॥
प्रपन्नः प्रेमाणं भगवति सदा भागवतभाक्
पराचीनो जन्मावधि भवरसाद् भक्तिमधुरः ।

प्रयातव्य इति । हे चतुर कलहंसीकुलपते ! नन्दतनयः कृष्णः दृष्टेरनुभवपथं प्रयातव्यः प्रकर्षेण प्रापयितव्यः द्रष्टव्य इति यावत्, स्मरपरिचितानां कामार्त्तानां गोपीनाम् उपकृतिः उपकारः विधेया कार्या । इयं मथुरापि त्रिचतुरैः यामैः प्रहरैः न तु बहुभिर्दिनैरिति भावः गम्या प्राप्या नातिप्रयासस्तत्र गमने इति भावः । इतीत्थं विचार्येति शेषः अन्तः मनसि द्वैधं गच्छामि वा न वेति संशयं मा गाः कलय न कुरु ॥ १३९ ॥

अपूर्वेति । हे कादम्बीरमण हंसीपते ! यस्य तव अन्तः मनसि मुदा हर्षेण अपूर्वा अद्भुता सारसा सरोवरविषयिणी वा वा रुचिरा रसरुचिः अनुरागवासना विलसति स्फुरति, येन त्वया सपदि सहसा मिलिते पयसी जलक्षीरे इत्यर्थः विवेक्तुं पृथक् कर्तुं शक्येते, तस्य कृतिनः कार्यकुशलस्य भवतः मथुरासङ्गमविधौ मथुरागमनविषये विलम्बः कथङ्कारं युक्तः उचितः भवतु ? नैवोचित इत्यर्थः ॥ १४० ॥

प्रपन्न इति । भगवति कृष्णे प्रेमाणं प्रपन्नः प्रेमवानित्यर्थः

चिरं कोऽपि श्रीमान् जयति विदितः साक्षात्तया
धुरीणो वीराणामधिधरणि वैयासकिरिव ॥ १४१ ॥

रसानामाधारैरपरिचितदोषः सहृदयै-
र्मुरारातिक्रीडानिविडघटनारूपसहितः ।
प्रबन्धोऽयं बन्धोरखिलजगतां तस्य सरसां
प्रभोरन्तः सान्द्रां प्रमदलहरीं पल्लवयतु ॥ १४२ ॥

इति श्रीरूपगोस्वामिविरचितं हंसदूताख्यं काव्यं समाप्तम् ।